CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

SATICHARITAM

(A Mahakavya in 11 Cantos)

BY

K. S. KRISHNAMURTI SASTRI,

Sastraratnakara, Mahamahopadyaya

Poet Laureate in Sanskrit to the Madras State

&

Author of Prakritivilasa, Stavaratnathraya etc.

PRINTED AT

SRI RAMAKRISHNA PRESS, MADURAI

1953

PRICE RS. 2—0—0

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

40

श्रीः

सतीचरितमहाकाव्यम्

ास्त्ररत्नाकर, महामहोपाध्याय कविको
किलादिबिरुदालङ्कृतेन प्रकृति
विलासस्तवरत्नत्रयादिनैक
ग्रन्थप्रणेत्रा मद्रराज्य
संस्कृतास्थानकविना
. S. कृष्णमूर्तिशास्त्रिणा विरचितम्

Shankaracharya Sanskrit Mahavidyalaya
719

—मूल्यं रूप्यकद्वयम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीमत्परमहंस परिव्राजकाचार्यवर्य

श्रीजगद्गुरु श्रीमच्छङ्कर भगवत्पाद

प्रतिष्ठित श्रीकाञ्ची कामकोटिपीठा

धीश्वर श्रीमच्चन्द्रशेखर सरस्वती

श्रीपादैः क्रियते नारायणस्मृतिः

श्रीमहाभारतेतिहासप्रसिद्धं पतिव्रतामण्डलमण्डनायमानायाः सावित्र्याः सत्यवदग्रेसरस्य सत्यवतश्च चरितमवलम्ब्य मधुरानिवासि महामहोपाध्याय, मद्रमण्डलास्थानकवि, शास्त्ररत्नाकर, बिरुद परिमण्डित श्रीकृष्णमूर्तिशास्त्रिप्रणीतं वितीर्णं सतीचरितमहाकाव्यनामधेयं सरलमधुरपदवाक्यगर्भं हृदयङ्गमालङ्कारशैली पाकपरिलसत्सुवृत्तपद्यपरिशोभमानं ग्रन्थं समर्पितमस्मत्सविधे साक्षात्कृत्य सन्तुष्यामः ॥ यत्र मद्रराजाश्वपतिसपर्यासम्प्रसन्नस्वप्नाविर्भूतं श्रीसरस्वत्यनुग्रहलब्धायाः पित्राद्यनुमत्या स्वयंवृतवराय देवर्षिनारदवचनावगतसत्यवदल्पायुर्भावाया अपि नारदोक्तवरान्तखरणे स्वानभिमतिवचनं "सकृद्वृतात्सत्यवतोऽन्यं मनसापि न कामये, कर्मसाक्ष्युदयास्तमयविपर्यासेऽपि हृद्यन्यस्य पत्युः स्थानं न विद्यते" इत्यादिकं "सकृदंशो निपतति सकृत्कन्या प्रदीयत" इत्यादि भारतवचनैरेव निरूपयन् कविस्तस्या असाधारणीमपांसुलानां धुरि कीर्तनीयतामाविष्करोति। सावित्रीसत्यवनोः परिणयानन्तरं स्वपतिश्वशुराति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

थिसत्कारतत्पराया नारदोक्तं मनसिकृत्य कमितुर्दीर्घायुःप्रदव्रत नियमानुष्ठान कर्शिताया अपि फलेन्धनाद्याहरणाय वनं गच्छन्तं चित्राश्वं श्वशुरानुमत्या समनुगच्छन्त्याः पत्युःप्राणानादाय स्व स्थानं प्रस्थितयतः परेतराजः पश्चात्स्वपातिव्रत्यगौरवेण गच्छ न्त्याश्चतुरमधुरशास्त्रानुमत धर्म्यस्तुत्यनुनयवचोभिः परितुष्टस्य होमाग्नि प्रभवश्रीसरस्वत्यनुग्रहलब्ध सावित्री शरीरसमुज्जृम्भ माण पातिव्रत्यान लज्वालादाहभीति समाक्रान्तहृदयस्यानुग्रहाच्छ व शुरस्य च्युतराज्यदृक्छक्तिप्राप्तिप्रभृतिस्वपतिचिरजीविकान्तं वरचतुष्टयं शमना त्परिगृह्य, धवेन सह वने श्वशुराश्रमप्राप्तिः ततः प्रमोद परिपूर्णहृदयानां साल्वराज्यसमागमः द्युमत्सेन पट्टा भिषेकः चित्राश्वयौवराज्याभिषेचनं प्रजारञ्जनपूर्वकं राज्यपरि पालनमित्यादिकं सुनिपुणं मधुरया सरलया सरण्योपवर्णयन्मा धुरसरलोऽयं कविरव्याजपातिव्रत्यस्य दुस्साध्यं वस्तु जगत्यां नास्तीति नारीमणीनां मनस्याविर्भावयति। तदिदं काव्यरत्नं स्वार्थजातं प्रकाशय त्सहृदयानां प्रमोदाय कल्पताम्। कविरपि श्रीचन्द्रमौलीशकृपया श्रेयांसिप्राप्नोत्वितिचाशास्महे ॥

— नारायणस्मृतिः ॥

विजययात्रास्थानं श्रीमध्यार्जुनक्षेत्रम्
नन्दननामसँ. माघबहुळपञ्चमी सौम्यवासरः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

AUTHOR'S NOTE.

Saticharitam is the third in the series of my published works. It tells the story of Savitri and Satyavan. It is a Mahakavya in eleven cantos.

The first four cantos of the work was composed in my youth. The first of these was published in the 'Samskrita Kamadhenu' that hailed from Kallidaikurichi thirty years ago and discontinued after a short career. After a long interval the four cantos were published in the 'Madhuravani' of Belgaum.

I had left the poem at the fourth canto and had owing to mental agornies developed a disinclination to complete it. This state of affairs continued for more than three decades. Some friends recently urged me to complete the poem the most important among them being Sri V. Subrahmanya Iyer, Principal, Rameswaram Devasthanam Pathasala, Madurai, to whom my heartful thanks are due.

Sriman Ganapatisubrahmanya Iyer, the proprietor of Kozhumam Ramakulam Estate, prince among benefactors, undertook to meet the entire cost of publishing the work. The innumerable charities of Sri Iyer are so well known in South India I have proposed to write a book about them. To him and the managing staff of his estate who are great promoters of Sanskrit learning my eternal gratitude is due.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

I take this opportunity of expressing my deep felt gratefulness to His Highness the Maharajah of Cochin, Sri Sundaram Iyer of Oonjalur, Sri N. Swaminatha Iyer of Vishnupuram, Sri Chondat Krishna Unni Mannadiar and Sri K. M. S. Lakshmana Iyer of Madurai who have continuously and liberally extended their munificence for the publication of my writings. It is my prayer that other lovers of Sanskrit may follow their example and come forward to help me in making my efforts to have my other works also printed a success.

Lastly, I express my sincere thanks to Sri V. Subrahmanya Iyer, Principal who kindly went through the manuscripts and to the proprietors of Sri Ramakrishna Press, Madurai for their very prompt and neat execution of the work.

Madurai,
7—1—1953.

K. S. Krishnamurti Sastri,
Shastraratnakara, Mahamahopadhyaya,
Poet-laureate in Sanskrit to the Madras State.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

श्रीः

॥ समर्पणम् ॥

चोण्डच्छ्रीकृष्ण उन्नीत्यधिमहि
वलियः श्रेष्ठमन्नाडियार्यः
धर्मेणेवाध्यगीषि श्रितशुभ-
वपुषा येन संरक्षितोऽहम् ।

लक्ष्मीवानार्यगृह्यः शुभमति-
रनघैरर्हणीयो गुणैर्यो
नल्लप्पिल्लीममुष्मायाधिवसत
इमं ग्रन्थमेषोऽर्पयामि ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

प्रथमस्सर्गः

विद्योतताम्नन्तरहर्दिवन्तदुद्यद्विवस्वत्किरणारुणाभम् ।
अन्विष्यमाणं मुनिभृङ्गवृन्दैर्गजेन्द्रवक्त्रस्य पदारविन्दम् ॥ १

विभ्रत्कैरविणीविटं स्वमुकुटे गङ्गां जगत्पावनीं
प्रालेयाचलकन्यकां दधदतिप्रेम्णार्धदेहेन यः ।
मन्त्रात्मेति मखाधिदैवतमिति श्लाघ्यं हुतश्चेति यं
प्राहुस्स प्रणतार्तिभञ्जनकरो यज्ञेश्वरो वोऽवतात् ॥ २

अस्ति प्रशस्तामरराजधानीमपि श्रिया जेतुमिवोल्लसन्ती ।
सा दुष्प्रवेशा मनसाप्यरीणां मद्राभिधाना नगरी विशाला ॥ ३

यत्रेन्द्रनीलोपलसौधनिर्यज्ज्योतिःप्रवाहस्य परंपराभ्रे ।
मन्दाकिनीं द्रष्टुमिवोद्यता स्वसखीं धरण्या यमुनेव रेजे ॥ ४

उत्तुङ्गहर्म्याग्रगवाक्षमार्गे चरन्विधुर्दर्पबलेन भेजे ।
पराभवं स्त्रीमुखपङ्कजात्तच्चिह्नं बतेङ्गालविलेपमन्तः ॥ ५

कथं विजानातु विमूढलोक उदन्तमेतं परिशङ्कते यत् ।
छाया मृगो वाथ शशो न्वितीह वृथा, त्र नैवास्ति हि तत्प्रसक्तिः॥

यस्यां वियद्यापितया गृहाणां वितन्वतां स्वर्गधियं हुताशः ।
हुतं ददौ प्रत्यहमेव यस्त्वसुरभ्रमाद्भर्यनिवासभाग्भ्यः ॥ ७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

फुल्लासिताब्जायतलोचनास्ता निष्टतचामीकरतुल्यभासः ।
योषाश्च नीलोपलसौधकूटेष्वभ्रेष्वदृश्यन्त तडिल्लतावत् ॥ ८

दिवार्ककान्तोपलनिर्मितोच्चप्रासादभित्युत्थमहानलोष्ण्यात् ।
मन्दाकिनी कोष्णजला बभूव हिताय मज्जत्सुरसुन्दरीणाम् ॥ ९

प्रत्युप्तसौपर्णमणीन्दुशालाभुवां प्ररोहान्महसां कचित्खे ।
निरीक्ष्य दूराद्रविरात्मवाहान्घासभ्रमाच्चारयितुं प्रवृत्तः ॥ १०

दिनावसाने निलयं घटोघ्न्यो गता अखिद्यन्त पदाभिघातात् ।
विशीर्यमाणैः खुरमध्यलग्नैस्सोपानमुक्ताफलकैरमन्दम् ॥ ११

वापीं प्रपन्ना वनजायताक्ष्यः स्नातुं दिवा नीलसरोरुहाणि ।
फुल्लानि तद्वक्त्रविधोर्निमित्तादज्ञानतो वीक्ष्य गतास्स्मयं ताः ॥

मन्दानिलोद्धूतपलाशबालरसालकूजत्कलकोकिलासु ।
उद्यानवाटीष्वरमन्त यूनां सङ्घास्सदा वारविलासिनीभिः ॥ १३

क देवलोकः क च सत्यलोकः क विष्णुलोकः क शिवस्य लोकः ।
कश्शक्नुयाद्दर्शयितुं समक्षं सर्वन्निवदं नामत एव भेदः ॥ १४

यत्रार्भकास्स्फाटिककुट्टिमेषु सङ्क्रान्तमातृप्रतिमासहस्रम् ।
दृष्ट्वा व्यमुह्यन्परितः क्षुधार्ताश्चङ्क्रम्यमाणा निजजानुयुग्मैः ॥

कामाहवं भर्तृभिराचरन्त्यः स्त्रियश्च ताश्चक्रबृहन्नितम्बाः ।
निशासु तादृङ्निजकर्म सत्सु स्वप्नेषु वीक्ष्येयुरतीव लज्जाम् ॥ १६

Funding by IKS, MoE, Govt. of India

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शब्दार्थयोर्नित्यमुदीरयन्ति संबन्धमज्ञानवशात्पदज्ञाः ।
यदत्र पुर्यामभिधेयमेवं हित्वा स्थितोऽयं खलु दुःखशब्दः ॥ १७

अङ्गान्यलङ्कर्तुमथेहमानाः स्त्रीणाञ्च दिव्याभरणैर्युवानः ।
करोल्लसत्काञ्चनमेखलास्ते मध्यानवाप्तेः परिमोहमीयुः ॥ १८

प्रतिक्षणं यत्र विजृम्भमाणैरुरोजकुम्भैर्नवकञ्चुकानि ।
मुहुर्मुहुर्वीक्ष्य विदारितानि नार्यो निनिन्दुर्निजयौवनं ताः ॥ १९

प्रासादसौवर्णमृगेन्द्रजातत्रासप्रधावत्करियूथपेषु ।
महेषु रोहत्पुलका युवानो बभुर्द्रतस्त्रैणकुचाभिमर्शात् ॥ २०

(महेषु + उत्सवेषु)

यत्राञ्जनाद्रिप्रतिमेभगण्डदानार्णवेष्वश्वखुरोत्थितानि :
पङ्की भवन्त्याशु निपत्य हेमभुवो ययुर्दोहदतां रजांसि ॥ २१

योषित्तडिद्द्योतितमध्यभागामुद्दामकल्याणमृदङ्गनादाम् ।
दृष्ट्वा मुदा नीलमणीन्दुशालाकादम्बिनीं द्राङ्ननृतुर्मयूराः ॥ २२

(कादम्बिनीं + मेघमालाम्)

शिरोगृहद्वारविलम्बिमत्तमातङ्गतुल्यासितमेघपङ्क्तीः ।
अध्यारुरुक्षन्निव कान्तिमत्यः कान्तैर्दिनान्ते कुतुकाद्वराङ्ग्यः ॥ २३

भित्वोत्थितां भोगवतीमिवोर्वीमाक्रष्टुकामा भुजगा इवान्तः ।
विरेजिरे यत्परिधाजलौघच्छायाद्रुमा मन्दमरुद्विधूताः ॥ २४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(उर्वीं भित्वेत्यन्वयः)

उद्घाट्य नीडं सह भाषमाणाः कीराङ्गनाभिः कुतुकात्पुरन्ध्र्यः ।
कामं व्यपीदन्वत ! कीरपार्श्वपक्षाग्रवाताहतसत्कपोलाः ॥ २५

विहारदुर्वर्णशिलोच्चयाश्च श्यामा वनेस्सानुषु भूरुहाणाम् ।
शृङ्गेषु चेन्दोः कलया विरेजुः तां कृत्तिवासश्चिरमादधानाः ॥२६

यत्र स्मरस्त्रीकुचमण्डलेषु सङ्क्रोधतो वैरिहराद्विबुद्धया ।
विव्याध नीलोत्पलसायकेन लग्नं तु तच्चूचुकतामयासीत् ॥२७

नभश्च यच्छन्दगुणाश्रयत्वात्क्षित्यादितस्सिध्यति भिन्नमेव ।
मध्यीभवत्तत्पुरसुन्दरीणां काञ्चीनिनादैरनुमीयते स्म ॥ २८

छिन्नेभदन्तच्छविभृत्कपोला यदा विहर्तुं विविशुस्सरांसि ।
तासाङ्गतिं वीक्ष्य तदा मरालयो विलज्जितास्तत्यजुरात्मदर्पम् ॥

आरोपितान्गोशकटेषु दृष्ट्वा करेणवो विद्रुमयष्टिभारान् ।
प्रदुद्रुवुश्चारुमहेक्षुदण्डभ्रमादनादृत्य नियन्तृवर्गान् ॥ ३०

परस्परस्वीकृतमित्रभावप्रजास्वभावात्कलहस्य यस्याम् ।
वोढुं व्यलज्जन्पदमस्तकृत्यं न्यायाधिपा विस्मृतनीतितन्त्राः ॥ ३१

यत्रान्यदेशाभिजना जनौघाः कालं निनीषन्त इवोषुरस्वाः ।
निकेतनेष्वाहितराजराजविभूतिषु प्राप्य चिरप्रतिष्ठाम् ॥ ३२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(राजराजः + कुबेरः । ऊषुः = अवात्सुः अस्वादरिद्राः)

द्रष्टुञ्च नेष्टे पुरभोग्यजातमक्ष्णां सहस्रं त्रिदिवेश्वरस्य ।
तद्वैभवं वर्णयितुञ्च नालं शेषोऽयमन्ये कवयो वयं क्व ? ॥ ३३

एनां चिरत्नां नगरीं मनोज्ञां स किन्नराणामलकामिवेशः ।
शशास नाम्नाश्वपतिर्महात्मा श्रीकण्ठपदाब्जनिविष्टचेताः ॥ ३४

श्रुत्यन्तविद्योदधिपारदृश्वा श्रुत्यन्तगस्वच्छयशःप्रतापः ।
प्रतीपभूपालकुलान्धकारसहस्ररश्मिर्नृपपिङ्गदृष्टिः ॥ ३५

श्रुत्वा प्रतापं पृथिवीभुजोऽस्य प्रत्यर्थिभूपाश्चकिता नितान्तम् ।
द्रुतं गरुत्मन्निनदातिभीतवल्मीकवाताशनरीतिमापुः ॥ ३६

कोशं विशत्यस्य तदैव शत्रुसाम्राज्यलक्ष्मी, रवनीपतिस्सः ।
यदारियोषिन्मुखसारसेन्दुः कृपाणमुद्धर्तुमियेष कोशात् ॥ ३७

सान्ते यदोजोयशसी उभे ते कृत्वाप्यनन्ते च ततोऽप्यतृप्तः ।
अदन्तमर्कं विदधाति सान्तं रात्रौ, तथा चन्द्रमथाह्नि वेधाः ॥

ज्याघोषविद्रावितदिक्करीन्द्रो मुमोच भूपान्युधि कान्दिशीकान् ।
तद्धामिनीप्रार्थनया स मत्वा लुप्ताद्यवर्णस्वपदाभिधेयान् ॥ ३९

निकृत्तभीमोरुपराक्रमारिकण्ठच्युतार्द्रक्षतजावलिप्ता ।
यस्यासिवल्ली समरेषु रेजे कृतान्तजिह्वेव युगान्तकाले ॥ ४०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जितावनीपालसहस्ररत्नकोटीरविद्योतितपादपीठः ।
वियत्समक्षौमविलीनहेमकुम्भस्तनीवीजितचामरस्सः ॥ ४१

माणिक्यसिंहासनहंसयोषित्तूलोपधानेषु कृतैकपार्श्वम् ।
निषद्य शुश्राव यशस्स्वमच्छं कलस्वनस्त्रीमुखगीयमानम् ॥ ४२

तं कामसौभाग्यविलोपिरूपं दृष्ट्वार्दिताया झषकेतनेन ।
कस्या नितम्बाच्छिथिलीबभूव क्षौमं न वित्रस्तमृगायताक्ष्याः ॥

स चातिशेते स्म निजौजसाग्निभुवं तथेन्द्रं निजराजलक्ष्म्या ।
वाचस्पतिं स्वस्य कुशाग्रबुद्ध्या स्मरं स्वरूपेण मुखेन चेन्दुम् ॥४४

रक्तोत्पलश्रीहरणैकदक्षकरप्रवालेन महीभुजोऽस्य ।
बाहालता शीर्षविराजमानरत्नाहिराजस्य बभार लक्ष्मीम् ॥ ४५

तं व्यूढवक्षस्स्थलरुक्मवर्मप्रत्युप्तवैदूर्यमयूखजालैः ।
स्थलाब्जमाला चचकासदेनं कण्ठे लुठन्ती द्विगुणीकृतश्रीः ॥

असंशयाभ्यस्तसमस्तविद्यः क्षमापतिः कुण्डलकैतवात्सः ।
स्वकर्णयोः कुण्डलनां वितेने श्रोतव्यविद्याविरहादितीव ॥ ४७

तदीयताम्रौष्ठपुटान्तरोत्थपाण्डुस्मितश्रीरधरीचकार ।
असंशयं क्रोकनदोदरस्थमनोज्ञकादम्बतनोश्च लक्ष्मीम् ॥ ४८

बाण्याः कलत्रीकरणोपजातं लोकेशपत्न्यास्स्वयमागतायाः ।
श्यामं ललाटेऽपयशोऽस्य शङ्के चा ललामेति वदेत्सुविद्वान्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यतोऽर्थिनः प्रप्य तमाप्तभाग्या आजीवमर्थित्वमथाजहुस्स्वम् ।
चिन्तायुतत्वात्तदसूययेव चिन्तामणिः प्राप यथार्थसंज्ञाम् ॥ ५०

(स्वं = स्वीयम्)

जात्वेवमाप्तैहिककामनस्य राज्ञस्तनूश्चाश्वनपत्यचिन्ता ।
विशोषयामास पिशाचिकेव शनैश्शनैर्वृद्धिमुपेत्य, नित्यम् ॥५१

दिनेषु यातेषु कदाचिदेष मद्राधिपस्स्वप्नगतामपश्यत् ।
वाणीं स्वभक्तानुजिघृक्षया तां नामात्मतां याति यया प्रपञ्चः ॥

कराम्बुजास्फालितमञ्जुवीणां धराधरस्पर्धिकुचाभिरामाम् ।
चराचराम्बामभिवन्द्यपादां मरालपत्रोपरि राजमानाम् ॥ ५३

अनल्पजल्पाकसुकिङ्किणीकमञ्जीररश्मिच्छुरिताङ्घ्रिपद्माम् ।
अम्बां दुकूलान्तरितस्वकाञ्चीमणिस्त्वनैकानुमितद्युमध्याम् ॥ ५४

विनिर्जिताशेषसितेतराञ्जमानोज्ञकाकर्णविशालनेत्राम् ।
प्रत्यग्रसञ्छिन्नमदोद्धताभ्रमातङ्गदन्तच्छविभृत्कपोलाम् ॥ ५५

भृङ्गावलीढाग्रमधुप्रपूर्णसुवर्णकुम्भस्तनभारनम्राम् ।
द्विधाकृतस्मेरसुपक्वबीजपूरार्धखण्डद्युतिकर्णभूषाम् ॥ ५६

निसर्गरक्तौष्ठपुटप्रवालमध्यप्रसूनोपममन्दहासाम् ।
धम्मिल्लकल्पद्रुसुमाग्रपातिपुष्पन्धयालीमुखरीकृताशाम् ॥ ५७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्भुजामिन्दुलवावतंसां धृताक्षमालैककरारुणाब्जाम् ।
तां विद्रुमाङ्गुष्ठनखाग्रमञ्जुविस्फालनश्रीगुणरत्नवीणाम् ॥ ५८

एकैकभृङ्गोषितमध्यभागप्रफुल्लमल्लीकुसुमस्रगेका ।
व्यामिश्रितेन्द्रासितरत्नहारमुक्तालतेवाभ्रियताथ देव्या ॥ ५९

सहस्रजन्मग्रहणेऽप्यलभ्यं मन्दात्मनां यच्चरणाम्बुजाग्रम् ।
साम्बास्य बद्धा दृढभक्तिरज्ज्वा समग्ररूपं समदर्शयत्स्वम् ॥६०

आजानमूकः कवयाम्बभूव कारुण्यपीयूषकटाक्षपातात् ।
यस्याश्शुभव्याकरणैकगम्यस्फोटात्मिकाया जगदम्बिकायाः ॥

वाणीमिमां तामरसाक्षवक्षस्स्थलश्रितां ख्यान्ति बुधाश्च लक्ष्मीम् ।
उमां तथा चन्द्रलवावतंसदेहार्धभूतां जननीं जगत्याः ॥ ६२

मागाश्शुचं वत्सक । धर्मपत्नी प्रसोष्यते ते नचिरात्तनूजाम् ।
इति क्षितीशं वचनामृतेनाभिषिच्य देव्यन्तरधत्त सद्यः ॥ ६३

मन्वीत चेत्स्वं कृतकृत्यमाप्त्वा किञ्चित्कुतश्चित्कृपणाज्जनोऽज्ञः ।
कियन्तमानन्दमविन्दतायं तदेति वक्तुं भुवि कः क्षमेत ? ॥ ६४

अहर्मुखे वन्दिशतैः प्रबुद्धो राजीवसन्दोह इव द्विरेफैः ।
शशंस स स्वाप्नमुदन्तमेतं दारेभ्य आत्माधिकलालसेभ्यः ॥ ६५

कुर्वत्यधः क्राणमथो विपञ्च्यास्समुत्सुका तं महिषी स्ववाचा ।
पुनः पुनश्शंसयति स्म कान्तमत्यादरात्खल्वधिकोऽनुयोगः ॥ ६६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(अनुयोगः = प्रश्नः)

पर्यष्वजेतां नयनोद्गताश्रू निरुद्धकण्ठौ पुलकाङ्किताङ्गौ ।
आनन्दपाथोधिनिमग्नमूर्ती एकीभवन्ताविव दम्पती तौ ॥ ६७

जहीहि कोपं कमलिन्यसौ ते प्राक्शैलकूटं रमणोऽधिरूढः ।
समेष्यति त्वामचिरादितीव वक्तुं विरेजे गगनेऽर्कसूतः ॥ ६८

उद्यन्तमादित्यमथोरुतेजा राजा यथावत्प्रयतस्समर्च्य ।
मनोज्ञवेषो महनीयकीर्तिस्सभां सुधर्मासदृशीं प्रपेदे ॥ ६९

रविं विपश्चिद्वदनाम्बुजानामपश्चिमं सत्ववतां नरेन्द्रम् ।
प्रत्युद्व्रजन्ति स्म सभासदस्तं सद्यस्समुत्थाय निजासनेभ्यः ॥

संभावयंस्तानुचितैर्वचोभिः सिंहासने चारुणि स क्रमज्ञः ।
उपाविशत्सिंह इवाद्रिशृङ्गे जयारवानन्दितकर्णयुग्मः ॥ ७१

प्रशान्तगाम्भीर्य इवाम्बुराशिः सभा तदानीं महती बभूव ।
अग्रेसरान्नीतिविदां स राजा समन्दहासं सचिवानुवाच ॥ ७२

चिरप्ररूढामलसौहृदय्यसारोऽद्यपत्यं भुवि नाम पित्रोः ।
तत्पित्रपातैकनिदानभूतं पूर्णः कथं स्यादनवाप्य मर्त्यः ॥ ७३

कुकूलवह्निप्रतिमं ममान्तरपत्यवैधुर्यजशोकवह्निम् ।
वाग्देवताम्बाशमयद्गता मे स्वप्नं, दवाग्निं घनमालिकेव ॥ ७४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या यज्ञवहन्युत्थितविग्रहा मामन्वग्रहीद्दग्धरदीप्तिपुञ्जा ।
सैवाधुना स्वप्नमुपेत्य भूरिकारुण्यपात्रं व्यधितेति मन्ये ॥ ७५

राज्यस्थितानाञ्च सतां सतीनामनुग्रहान्मे फलिता हि कामाः ।
यदार्तमेनं जननी प्रसन्ना स्वयं समासाद्य सुतामदित्सत् ॥ ७६

इत्येवमाभाष्य मिताभिभाषी सत्यव्रतो मौनमुपागमत्सः ।
मोमुद्यमाना च सभा सुराज्ञे स्वस्त्यस्त्विति प्रेमभराच्छशंस ॥

अथ स सुचरितानामग्रणीर्मुक्तसभ्यः
सपदि गदितुकामः प्रेयसीभ्यस्सुवार्ताम् ।
निजभवनमनल्पश्रीविलासं महीन्द्रो-
गजपतिरिव यूथाद्वह्वरं चाविवेश ॥ ७८

इति श्रीसतीचरितमहाकाव्ये मद्रमण्डला-
स्थानकविश्रीकृष्णमूर्तिकविकृते
प्रथमस्सर्गः

ॐ

तत्सत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

द्वितीयस्सर्गः

अथ भूमिभृदग्रणीर्दधानो मनसि प्रत्यहमम्बिकावितीर्णम् ।
वरमात्तकुतूहलस्स्वराज्यं प्रशशासेन्द्र इमावरावतीं सः १

अतिवाहय कानिचिद्दिनानि क्षममाणस्य हि हीयते न किञ्चित् ।
कमलासनकामिनीवचस्तन्न मृषा स्यादिति सान्त्वयन्स्वदारान् ॥

महिषी नृपतेश्च सच्चरित्रा विधिवत्प्रत्यहमर्चितुं प्रवृत्ता ।
परमेश्वरभामिनीं, जगत्या जननीं कामितदानकल्पवल्लीम् ॥ ३

नृपयोषिदुवाह विश्वमातुः कृपया दौहृदलक्षणं मनोज्ञम् ।
विफलानि भवन्ति जातुचिन्नो जगदम्बापदपङ्कजार्हणानि ॥ ४

नवलोभ्रमणीचकस्य लक्ष्मीं सुखमस्याः परिपाण्डुरञ्जहास ।
समुदैक्षयत तत्र मध्ययष्टिर्विषयदौपम्यनिराचिकीर्षयेव ॥ ५

(मणीचकःप्रसूनम्)

पृथुगौरपयोधरस्तरुण्या उपमीयेत च तेन चूचुकाग्रः ।
यदि नीलसरोजमण्डिताग्रः परिदृश्येत पयःपयोधिभङ्गः ६

(भङ्गः + तरङ्गः) (चूचुकाग्रः + व्यधिकरणबहुव्रीहिः)

क्रमशश्शिथिलीचकार वाञ्छां नवरत्नाभरणेषु गर्भखिन्ना ।
प्रथमेयमवस्थितिर्वराङ्ग्याः स्वकलाङ्गेषु मनोज्ञतां पुपोष ॥ ७

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स च यद्यदभीप्सितं प्रियाया अविलम्बेन दिशंस्तदिङ्गितज्ञः ।
नृपतिः परिपीय लोचनाभ्यामसकृन्नैव ततर्प गर्भपूर्णाम् ॥ ८

अथ पुंसवनादिकृत्यजातं विधिवच्छ्रोत्रियसन्निधौ प्रमोदात् ।
क्षितिपोऽलिपतकामधुग्व्यतानीद्धनदान्सर्ववनीपकांस्तदानीम् ॥ ९

दिवसेषु गतेषु केषुचित्तन्महिषी संसुषुवे शुभे मुहूर्ते ।
विमलां कमलामिवोल्लसन्तीं तनयां काञ्चन काञ्चनाङ्गवल्लीम् ॥

किमियं द्युमणेर्नु दीधितिस्स्यादुत विद्युल्लतिका कला स्विदिन्दोः ।
इति वामविलोचनासमूहः समदिग्धोद्भवकाल एव तस्याः ॥११

शशिशेखरसुभ्रुवः कला वा कमलाया नु कला कला नु वाण्याः ।
इति सन्दिदिहुस्समीक्ष्य जातां निरणैषुर्न जनाः कथञ्चिदन्ते ॥

विनिवेद्य सुधाझरीसगोत्रां शुभवार्तां परिषद्वताय राज्ञे ।
कति वा ललना न लेभिरेऽस्मान्नृपतेरुत्तमपारितोषिकाणि ॥ १३

असितानि वसूनि हस्तिनोऽश्वान्नवधान्यानि पयस्विनीरसङ्ख्याः ।
विततार मनस्विनां वरोऽसावववनीन्द्रोऽवनिदेवतल्लजेभ्यः १४

परितो हरितःप्रसेदुरासीद्विमलं खं, त्रिगुणा ववुस्समीराः ।
जलमच्छमभूत्प्रदक्षिणार्चिर्हविरादत्त धनञ्जयस्तदानीम् ॥ १५

भुवनेऽश्वपतेर्महिष्यसावीत्तनयां श्रीजगदम्बिकांशभृताम् ।
इति नारदतो निशम्य वाचं त्रिदिवेशा जहृषुर्भृशं सदाराः ॥१६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
सुदिता ववृषुस्स्रवन्मधूनि त्रिदशाः कल्पसुमानि मञ्जुलानि ।
ननृतुस्सुरवारवामनेत्रा वरगन्धर्वगणा जगुर्मनोज्ञम् ॥ १७

हसतीप्सति गायति प्रहृष्यत्यतति भ्राम्यति नृत्यति स्तवीति ।
जनता जननोत्सवे कुमार्या महति, क्षोणिभृतोऽस्य राजधान्याम् ॥

अचलेन्द्रसगोत्रवारणेन्द्रैः पवनस्यापि निकारमावहद्भिः ।
तुरगैर्निशितायुधैः प्रवीरैर्जटिलाभूदखिलापि राजवीथी ॥ १९

अथ भूदिविषद्भिरात्मविद्भिस्सह संमन्त्र्य सभामुपेयिवद्भिः ।
नृपतिर्विनयोज्ज्वलः कुमार्यै स च सावित्र्यभिधां ददौ यथार्थाम् ॥

नृपमन्दिरसुन्दरीजनेन स्पृहणीयाखिलमोहनौषधिस्सा ।
समवर्धत शुक्लपक्षचन्द्रप्रभयौपम्यमुपेयुषी क्रमेण ॥ २१

मुखपङ्कजनिर्गते स्मिते वा रुदिते वाऽनियमेन जायमाने ।
समलक्ष्यत रामणीयकं तत्सममेव क्षितिवल्लभात्मजायाः ॥ २२

रुचिरैरचिरोद्गमैश्च दन्तैर्नवमल्लीमुकुलश्रियं हसद्भिः ।
जनितं स्मितमेकमेव तस्या जगतीमोहनहेतुरित्यमानि ॥ २३

निजमातुरिमां ग्रहीतुकामाः करपद्मं प्रथमं प्रसार्य, पश्चात् ।
अनया परिवञ्चिताश्च काश्चित्कतिचित्प्राप्तमनोरथा बभूवुः ॥ २४

स्खलितं यदभूद्वचस्सु तस्याः तदपि प्रीतिमजीजनज्जनानाम् ।
यदियं बहुधापि शिक्ष्यमाणा न जहावस्फुटतां मनोज्ञवाण्याम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विधुमाप्तुमनाः कदाचिदेषा करपद्मं समुदस्य रोदिति स्म।
स्वकरार्पितदर्पणेऽथ दृष्ट्वा मुखमात्मीयमहो! समाधिमाप॥ २६

यदि किञ्चिदभीप्सितं विभायादितरस्मात्तदगृह्यत स्मितेन।
मम देहि तदित्युदीर्यमाणा सहसा साऽयकरोन्मुखारविन्दम्॥

मणिकुट्टिमबिम्बिता जनन्याः प्रतिमा मोहकरीर्विहाय सद्यः।
अवबुध्य च मातरं ययौ सा निजसंविद्विषयेण लक्षणेन॥ २८

शिशुभिस्सह वासरावसाने विहरन्तीं परिधूसरां मृदा ताम्।
परिमृज्य बलाद्गृहं निनीषुः प्रमदायासमतीव कापि लेभे॥ २९

अविभेन्न नृपात्मजा कुतश्चिच्छिशुरप्यत्र न चित्रमस्ति किञ्चित्।
यददोहृदयाम्बुजन्मरङ्गस्थालमाश्रित्य ननर्त धैर्यलक्ष्मीः॥

अतनिष्ट यथेष्टमष्टमाब्दे स्वमतिं सर्वकलास्वसौ सुतीक्ष्णाम्।
विदुषी धिषणं जयेदयत्नादिति सर्वैर्ध्रुवमभ्यमन्यतापि॥ ३१

असकृत्परिशीलनाद्वयस्यीकुरुते स्म स्वमतेस्समस्तविद्याः।
विमला प्रतिभा तया स्वकीया विदुषां संसदि विन्ययुज्यतैव॥

क्व च मे मधुरस्वरः क्व हेयं रणितं तेऽद्य तथापि मा व्यथां गाः।
इति सा परिमृज्य वल्लकीं स्वामससान्त्वत्परिवादनच्छलेन॥ ३३

वयसि प्रथमेऽपि वर्तमाना न च तत्वार्थमुवाच राजपुत्री।
स्वयमेव, विपश्चिदुत्तमेभ्यो न शमी ब्रह्मिमलोडिता ददीत॥ ३४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिथीनखिलानुपाचरत्सा समरक्षत्प्रतिवासरञ्च दीनान्।
अवबुध्य तथाचचार पित्रोर्वरिवस्याऽखिलभाग्यदायिनीति ॥

अथ मन्मथराजसख्यवस्था स्पृहणीयाऽवनिवासवात्मजायाः।
वपुषि स्वयमाप्तुमाधिपत्यं गतकल्पां शिशुतां व्यपानिनीषत् ॥

अलकेन विधुन्तुदं मुखेन द्विजराजं निजपाणिनारुणाब्जम्।
नयनेन सितेतराब्जमूरुद्वितयेनाथ जिगाय सापि रम्भाम् ॥ ३७

शरपाण्डरगण्डपत्रभङ्गीं शफरीसन्निभलोचनाभिरामाम्।
जितबालमृणालबाहुवल्लीमसृजत्तामचिरत्न एव धाता ॥ ३८

युवनेत्रचकोरचन्द्रिका वा विमलस्फाटिकसालभञ्जिका वा।
नयनामृतवर्तिकाथवेयं त्रिजगन्मोहमहौषधिर्भवेद्वा ॥ ३९

चिकुरप्रकरैर्जितश्चलाक्ष्याः पुरतः स्थातुमशक्नुवन्ह्रियाऽस्याः।
किमु पृष्ठमवाप धावितुं द्राग्जवयुक्तस्य मृगस्य चामरोऽपि ॥

वियता सदृशं चलं दुकूलं तदुरोजद्वयगोपनासमर्थम्।
धरणीधरशृङ्गपातिशुभ्रस्तनयित्नोर्विहृतिश्रियं जहास ॥ ४१

उपमानपदात्परिच्युतास्याः चिकुरं वीक्ष्य च भृङ्गराजिरब्जम्।
अधुनाप्यभिहन्त्यहर्मुखे "त्वं त्यज तन्नेत्रसमभ्रमं" न्वितीव ॥

अलकेषु च वक्रिमा न वाण्यां कठिनत्वञ्च कुचे न मानसेऽस्याः।
क्रमणेऽलसता न शास्त्रजाले परिहासस्त्वसखीजने न सत्सु ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विधुमण्डलतोऽग्रहीद्विधाता निखिलं सारमदामुखं सिसृक्षन् ।
लघुभूतमतः प्रभञ्जनेनोत्पतितं सद्दिवि सञ्चलद्विभाति ॥ ४४

वयसार्जितमन्वहं स्वसख्या बहुलावण्यधनं वपुष्यमुष्याः ।
कुचकाञ्चनकुम्भयोस्स कृत्वा जतुमुद्रामुपरि स्मरो नु तेने ॥ ४५

कुसुमायुधतन्त्रतत्वसारं स युवभ्यस्समुपादिदिक्षदस्याः ।
सुदृशोऽमृतवर्षशीतलो यः श्रुतिविश्रान्तदृगञ्चलस्य पातः ॥

अदयो हृदयं समस्तयूनां शिथिलीकर्तुमना इवातिमात्रम् ।
मदनः कबरीभरेषु तस्या निजबाणं किमतिष्ठिपत्तुरीयम् ॥ ४७

निजपञ्चममार्गणौ धनुर्भ्यां सह संयोज्य मुमुक्षति स्मरो नु ।
इति को बुबुधे न तादृगक्षिभ्रुवसंस्थानमुदीक्ष्य पक्ष्मलाक्ष्याः ॥

पुलिनस्थलरूढपीनरम्भायुगलं वर्धयितुं गभीरकूपम् ।
अणुवर्त्म च तस्य कुम्भयुग्मं वपुरुद्यानवनेऽसृजत्स्मरोऽस्याः ॥

रदनैरधरीकृतानि तन्व्याः नवमल्लीमुकुलानि लज्जितानि ।
न जहत्यधुनापि हि ध्रुवं स्त्रीकबरीभारमहान्धकारवासम् ॥

उदतीरदनादभाजि सर्वं विमलं मौक्तिकमित्यवेत्य खेदात् ।
उदधिर्हनुत एव तद्धि शक्तावपि हेये रमतेऽखिलस्स्वकीये ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(अभाजि + भङ्गं प्राप्तम्)

यदि विद्रुमशुक्तिका प्रसिद्ध्येत्तवमुक्ताफलमुज्ज्वलेत्तदन्तः ।
अरुणाधरबिम्बसंपुटान्तस्मितमस्या बिभृतां तदीयलक्ष्मीम् ॥ ५२

मुखमाब्जदशेवलच्च केशो जघनञ्चापुलिनद्वृगप्यमीनत् ।
ह्रदति स्म गभीरनाभिरित्थं तरुणी कापि तरङ्गिणीव रेजे ॥

युवनेत्रझषान्प्रभाझरेऽस्या विनिपत्यामिततृष्णया चरिष्णून् ।
बडिशैस्स्मरधीवरस्तदङ्गैर्गुणबन्धेन च हारिभिश्चकर्ष ॥ ५४

उपरि स्तनशैलयोर्गुरुत्वाज्जघनस्याप्यतिगौरवादधस्तात् ।
बत सूक्ष्मतरं तदीयमध्यं किमु सन्दंशगतं विनष्टमासीत् ॥ ५५

अतिचञ्चलचारुचेलकान्तः कनकाभस्सुखदर्शनस्तदूरुः ।
सपताकमनङ्गजैत्रयात्राविजयस्तम्भमिवात्यशेत काममम् ॥ ५६

कुसुमं नवयौवनं मनोज्ञं मृदुलाङ्गं लतिकाऽधरः प्रवालः ।
परिपक्कफलं स्तनस्सुगन्धिर्मुखवातो वपुरास्त नन्दनङ्किम् ? ॥

जघनस्तनघर्षणासहिष्णु स्वयमन्यत्र कदापि मा प्रयासीत् ।
इति काञ्चनदामभिस्त्रिभिस्तत्किमु सावित्र्युदरं स्मरो बबन्ध ॥

प्रवहेद्यमुनाधिरुह्य तुङ्गं पुलिनं यद्यसितोर्मिरस्तवन्धा ।
सुदृशः कबरी, नितम्बसङ्गिन्यवनिस्पृग्बिभृतां तदीयलक्ष्मीम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"सखि ! यावदियं सरोरुहाक्षी जनदृग्गोचरतां न याति, तावत्।
पठतूपनिषद्वचांसि लोकः कुरुतां शास्त्रविचारणां यथेच्छम् ॥

कथमेष रतौ रतिं विदध्यान्नृपपुत्र्यां मदनः परिस्फुरन्त्याम्।
सुकृतं कृतवान्मितेतरन्नः पृथिवीशोऽयमलब्ध कन्यकां यत् ॥

सखि ! रूपमिदं समस्तु कामं यदसाधारणतां गुणा व्रजन्ति।
दुहितुर्नृपतेरहं न जाने प्रियसख्यास्सदृशं पतिं पृथिव्याम् ॥

इति चास्तुत कामिनीसमूहः कमनीयाभिरनेकफक्किकाभिः।
अतिचित्रमिदं, यदन्ययोषिद्गुणविद्वेषि मनो नितम्बिनीनाम्

सुगुणा हृदयङ्गमस्वभावा निरवद्यान्वयशालिनी सुवृत्ता।
शुभवर्णपदोज्ज्वलामलाङ्गी वनिता सत्कवितेव सा रराज ॥ ६४

इति द्वितीयस्सर्गः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

तृतीयस्सर्गः

पितुर्निदेशादथ पङ्कजाक्षी कान्तं स्वकान्तं व्यचिचीषतासौ।
विवेश तन्मन्दिरमैन्दुरत्नं यदावसत्यात्मजनन्यनिन्द्या॥ १

एह्येहि जाते? क्व गतासि भूयात्स्वस्तिर्ममाङ्कं त्वमलङ्कुरु द्राक्।
इति प्रमोदातिशयादभाणि प्रविष्टमात्रैव सुता स्वमात्रा॥ २

(स्वस्तिशब्दोऽनव्ययोऽपि)

अवन्दतामन्दविनीतिनम्रा सावित्र्यमूं तामरसायताक्षी।
पुलोमजेवेन्द्रमवाप्य कान्तं चिरं रमस्वेति जनन्यवादीत्॥ ३

अम्ब? त्वदाशीर्नियतं फलिष्यत्यर्थोऽनुवर्तेत वचो हि साध्व्याः।
दिनावसाने स्म पिता ब्रवीति यत्तद्विवक्षाम्यधुना प्रसङ्गात्॥ ४

दृग्भ्यां निपीयाङ्कगतां पिता मामारुह्य जोते? शिबिकां सखीभिः।
भुवश्चरन्ती रमणं वृणीष्व गुणैर्मनोहारिणमित्यवोचत्॥ ५

अतो मया वन्दनपूर्वकं तद्वचश्शिरोरत्नसुहृद् व्यधायि।
ह्रीणा बभाणेत्थमसौ स्ववाण्या वीणाक्वणाधःकरणे प्रवीणा॥ ६

वत्से? ह्रियालं, विदितं हि लोके वयोन्विताभिर्नृपकन्यकाभिः।
गवेषणं पत्युरनिन्द्यसर्वगुणाकरस्यात्मपरिश्रमेण॥ ७

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतिर्हि कल्पद्रुमवल्लरीव सूते फलं तत्सहकारि दैवम् ।
स्वयत्ननिर्वृत्तमतर्कितोपनतात्परां प्रीतिमहो ! करोति ॥ ८

(कृतिः + प्रयत्नः)

इत्थं विमृश्यैव पिता मनीषी स्वतन्त्रतां दित्सति तेऽत्र कृत्ये ।
सतां मतिस्सत्पथमेव यायादिदञ्च सर्वं ह्यतिरोहितं ते ॥ ९

साविन्त्र्यशून्यं कुरु तन्नियोगं श्रेयोवसानो हि सतान्निदेशः ।
इत्येवमुक्त्वा नरपालपत्नी प्रेम्णा च पर्यष्वजतात्मजाताम् ॥ १०

चन्द्रप्रभाकन्दलसुन्दरेन्दुशालोदरे मन्दमरुत्किशोरैः ।
आसेव्यमानं नृपमिन्द्रकल्पमासेदतुस्ते जननी सुता च ॥ ११

स वन्दमानां प्रतिनन्द्य राजा प्रेम्णात्मजां मूर्धनि चोपजिघ्रन् ।
"काले विवाहः खलु कन्यकानां शोभेत कामं कमलायताक्षि ! ॥

दूरादुपेत्य स्वयमेव वल्ली कान्तं समालिङ्ग्य तरुं चकास्ति ।
उत्पद्य कुत्रापि परिभ्रमन्ती रत्नाकरं शैवलिनी वृणीते ॥ १३

यस्या जगन्मातुरनुग्रहात्त्वं सौन्दर्यसन्दोहनिधिः कुलेऽस्मिन् ।
अजायथास्सा तव भोक्तृरत्नं सन्दर्शयिष्यत्यचिरात्तनूजे ॥ १४

सख्यःप्रियास्सादिक*सन्निधानाःपुराद्रियन्ते‡ऽन्धिसुतोपमेत्वाम् ।
मितोऽनुयास्यत्यनुयायिवर्गः साकं प्रवीरैर्धृतभोग्यजातः ॥ १५

Funding by IKS-MoE

(* सादिकं + सदाभवम् । ‡ यावत्पुरेति लट्)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्राह्मं मुहूर्तं शुभदं वदन्ति मत्प्रेमपुत्रि ! प्रयियास तस्मिन् ।
अश्वस्तनं मा च कृथाः प्रयाणं संसन्तु कल्याणपरम्परास्ते ॥ १६

श्रेयोऽनुचिन्त्यैव भविष्यदावाम् अदीर्घकालं त्वदसन्निधानम् ।
सहावहे शारदचन्द्रवक्त्रे ! मा गास्त्वमप्यत्र वियोगदुःखम् ॥ १७

(आवां + पितरौ)

इत्येवमुक्त्वा विरराम राजा तस्यापि योषित्सममन्यतोक्तिम् ।
प्रहर्षसंफुल्लमुखारविन्दा सावित्र्यसावोमिति चाभ्यनन्दत् ॥ १८

अथेन्दुभासां प्रथमप्रसृत्या सन्दर्शनीयाद्विधुरत्नहर्म्यात् ।
परिस्रवन्तीं सरितं वयस्या विलोकयन्तीरभजन्मुदासौ ॥ १९

परस्परालिङ्गनपूर्वकास्तत्कालेचिताश्चाटुकथाप्रसङ्गाः ।
विहारभेदाश्च सखीसमाजे प्रीतिं वितेनुर्नरपालपुत्र्याः ॥ २०

सावित्रि ! नीहारकरः करैस्स्वैरुद्घाट्य नीलाम्बुजकोशमन्तः ।
अन्विष्यतीवात्मसहोदरीं तां लक्ष्मीं त्वदक्षिश्रयिणीमबुध्वा ॥

त्वद्वक्त्रतोऽभाजि निशीथिनीशः तच्चिह्नमन्तर्विभृतेऽयशोऽयम् ।
सावित्रि ! सूक्ष्मेक्षिकया विभाव्य तद्विद्धि विद्धीति विदुर्न के वा ॥

विधोः परीभावम *शक्नुवन्ति सोढुं त्वदास्यामलसारसेन ।
चान्द्राणि रत्नानि किमश्रुधारां मुञ्चन्तिनीरोद्धरणच्छलेन ॥ २३

* अशक्नुवन्ति + शत्रन्तम्

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वदङ्गलावण्यधनैकलेशमप्राप्य लक्ष्मीर्निधिदेवतापि।
विलज्जितेषत्तिमिरे भवत्या निलीयतेऽद्यासितपद्ममध्ये ॥ २४

(भवत्या इत्यस्य विलज्जितेत्यत्रान्वयः)

अनङ्गसन्मङ्गळसद्मवक्त्रं तवात्मभूरुन्नष्टुमनारसुधांशुम्।
प्रतक्ष्य टङ्केन जहार सारं नक्षत्र्यभूवन्परितो विशीर्णाः ॥ २५

भोक्तारमाकाङ्क्षति यौवनं ते कथं पितृभ्यां निरणायि चात्र।
अलं ह्रिया ब्रूहि नरेन्द्रपुत्रि ! त्वन्मङ्गलध्यानपरा हि सख्यः ॥ २६

इत्थं निगद्यालिजनेषु तस्या जिज्ञासमानेषु मुखादुदन्तम्।
सा कन्यकानां सुलभां विजित्य लज्जां विहस्येषदुवाच वाचम् ॥

युष्माषु किञ्चिन्न निगूहनीयं प्राणायमानेषु सखीजनेषु।
प्राक्प्रश्नतो वः कथनीयमेव व्यतेकरं तस्य सहध्वमाल्यः ! ॥

इत्योहतुर्वै तं सहिता सखीभिः विमानमारुह्य भुवश्चरन्ती।
आत्मानुरूपं रमणं वृणीष्व मत्प्रेमपुत्रीति पितादिशन्पाम् ॥ २९

रसोर्मिलालापविनोदिनीभिः प्रियालिभिर्मञ्जुलभाषिणीयम्।
द्राघीयसीं रात्रिमपि व्यतर्षीद्ब्राह्मे जजागार मुहूर्त एव ॥ ३०

गौरीसखं सा मनसा निदध्यौ ततोऽचिचिन्तद्धितमात्मनीनम्।
पित्रोर्गुरूणाञ्च पदमन्वजानि सुकेशी बिभराम्बभूव ॥ ३१

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रायुञ्जताशीर्वचनानि वृद्धाः तां मूर्ध्न्युपाघ्राय पिता प्रसूश्च ।
प्रेम्णा मुहुश्चिरश्लिष्यतुर्वराङ्गीं व्याहर्तुमित्थं समुपाक्रमेताम् ॥ ३२

प्रस्थाय संसाधय पूजयभीष्ट*सुपेषि यावद्रमणं गुणाढ्यम् ।
शिवप्रसादात्पथि मङ्गलानि प्रादुःष्युरस्मान्सफला भजस्व ॥ ३३

(*यावत्पुरेति लट्)

इत्थं तयोर्वाचमसौ निशम्य जिघ्राय किञ्चिच्च ततोऽनुमेने
प्रस्थापयन्त्यस्स्नपयाम्बभूवुरथालयस्तां प्रथमं सुकेशीम् ॥ ३४

(अथ स्नपयांबभूवुरित्यन्वयः । मङ्गलस्नानं कारयामासुरित्यर्थः)

अदर्शयन्त प्रमदाः पुरस्तात्तन्वीमलङ्कर्तुमुपात्तभूषा ।
अङ्गैर्मनोज्ञैरलमक्रियन्त सर्वाणि रत्नाभरणानि तस्याः ॥ ३५

(अदर्शयन्त + स्वयमेव विषया अभूवन्नित्यर्थः । णेरणाविति तङ्)

अमन्दनिष्यन्दमरन्दतुन्दमदालिमन्दारमणीचकानाम् ।
माला मृगाक्ष्याः कबरीभरेषु व्यद्योतताभ्रोदरचञ्चलेव ॥ ३६

(अभ्र + मेघः)

तदुन्नताङ्गुष्ठनखार्धचन्द्रश्रिया विरुन्धे न पदाम्बुजश्रीः ।
सान्ध्यं नभस्तारकितं जहास रक्तं पदं नूपुरमौक्तिकैस्स्वैः ॥ ३७

क्वाहं क्व ते निर्मलवक्त्रबिम्बं कुतो ममोपम्यमवानतं माम् ।
इत्थं नु तां वक्तुमिवेन्दुबिम्बं शिखानमच्छीरमिषात्सिषेवे ॥ ३८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्यास्सुवृत्तं मसृणं मनोज्ञं स्मरेषुधिस्पर्धि पदानुरूपम् ।
निष्टप्तरुक्मप्रभमावभासे जङ्घायुगं पङ्कजलोचनायाः ॥ ३९

क्षौमेन सञ्छन्नमपीक्ष्यशोभं युग्मं तदूर्वोः परिणाहिरूपम् ।
ईषत्तुषारान्तरितं सुजातं सुवर्णरम्भातरुमत्यशेत ॥ ४०

रम्येन्द्रचापच्छविपुञ्जपृक्तं दृश्येत चेत्सैकतमभ्रनद्याः ।
तेनोपमीयेत नितम्बबिम्बमस्याः प्रदीप्तं नवरत्नकाञ्च्या ॥ ४१

आञ्जारथाङ्गं किमु शम्बरारेः किञ्चैत्रयात्रारथचक्रमस्य ।
नितम्बचक्रं युवनेत्रहारि तस्या अभिव्यञ्जितयौवनाङ्ग्याः ॥ ४२

उज्जृम्भमाणं स्तनयोर्निषक्तसद्रत्नहारं युगलं मृगाक्ष्याः ।
तिरश्चकारार्यमरश्मिजालैर्हेमाद्रिमाकीर्णमनेकवर्णैः ॥ ४३

गङ्गे उभे स्पर्धितया सृजन्तौ तुषारशैलौ यदि दर्शयेताम् * ।
तयोस्सगोत्रौ सुदृशस्स्तनौ द्वौ गौरौ लुठन्मौक्तिकदामरम्यौ ॥

(* णेरणाविति तङ्)

कूलङ्कषोरोजसुवर्णशैलावध्यास्त माद्यन्मदनस्सुदत्याः ।
तिरश्चिकीर्षन्निव देवदेवमद्वैकदुर्वर्णगिरौ वसन्तम् ॥ ४५

स्मरोऽन्वभान्त्सीत्तदुरोजहेमशैलोपरीन्द्रासितरत्नसद्म ।
तत्र व्यभात्तद्वदनामलेन्दोर्ज्योत्स्ना मणिस्रग्वरतोरणाढ्ये ॥ ४६

वक्षोजयुग्मं तरलप्रभोर्मिखेलद्दुकूलं तरलायताक्ष्याः ।
उन्मज्जदैरावतकुम्भलक्ष्मीप्रभाप्रभावत्यनिशं व्यजेष्ट ॥ ४७

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(पयस्मरस्वति + क्षीरसागरे)

भृङ्गाः पराजेषत कुन्तलेभ्यः स्वभाववक्रेभ्य इभेन्द्रगत्याः ।
स्वर्भानुना चन्द्रवदावभासे वक्त्रं तरुण्याः कवरीभरेण ॥ ४८

प्रफुल्लमल्लीकुसुमस्रगस्या वेण्यां समद्योतत राजपुत्र्याः ।
कलिन्दकन्योर्मिपरम्परायां नक्षत्रमाला प्रतिबिम्बितेव ॥ ४९

विधुन्तुदस्यालककैतवेन समुद्यतस्सङ्ग्रसितुं मुखेन्दुम् ।
वक्त्राच्च्युतोऽयं गरलस्य बिन्दुरिति भ्रमं तत्तिलकं वितेने ॥ ५०

निसर्गरम्याणि तवाङ्गकानि ह्रीमन्त्यलङ्कर्तुमहो ! वयं स्मः ।
इतीव वक्तुं श्रुतिवर्त्म भेजे ताटङ्कयुग्मं प्रति भूषणेभ्यः ॥ २१

तत्कुन्ददन्तश्रियमद्वितीयामुत्पश्यदृक्षप्रतिमं सलज्जम् ।
मुक्ताफलं रन्ध्रमिव प्रवेष्टुं नासाग्रसीमन्यधिकञ्चचाल ॥ ५२

(ऋक्ष = नक्षत्रम्)

प्रसिद्धमेतद्यदनञ्जनत्वं श्रुत्यन्तविश्रान्तदृशः प्रकर्षः ।
चित्रं, तथाभूतदृशोस्तु तस्याः प्राकृष्यतैवाञ्जनवत्वयोगः ॥ ५३

मृणालबाहू मणिकङ्कणाढ्यप्रकोष्ठकौ स्वैरमुपोढरागौ ।
आश्लेक्ष्यतः क्षोणिभृतः कुमारं कं वाचिरेणेत्यखिलैरमानि ॥ ५४

निरर्घरत्नाभरणानि हृद्यैरङ्गैरलङ्कृत्य नृपात्मजेत्थम् ।
अवन्दतासौ पितरौ गुरूंश्च गौरीसपर्यां विधिवद्विधाय ॥ ५५

महीसुरेभ्यः प्रददौ घटोघ्नीः पयस्विनीर्वाजिवरान्गजेन्द्रान् ।
रत्नान्यमेयानि वसूनि, [illegible] ॥ ५६

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततस्सखीदत्तकरा मरालीमधिक्षिपन्ती गतिवैखरीभिः ।
नीतां पुरस्ताच्छिबिकां ज्वलन्तीं समारुरोह च्छविभिर्मणीनाम् ॥

द्वाभ्यां सखीभ्यां समुपास्यमाना सावित्र्यसावाभरणोज्ज्वलाङ्गी
लक्ष्म्या गिरां देवतया च सेव्यां गौरीं जगन्मातरमन्वकार्षीत् ॥

व्याहारविद्दूत्यपि काचिदाभिः क्रियास्वभिज्ञा युवतिः प्रतस्थे ।
वीरैश्चतुर्भिः परिमेय एव पश्चात्समन्वैदनुयायिवर्गः ॥ ५९

अश्रावि सन्मङ्गलवाद्यघोषो मञ्जीरनादोऽपि च नर्तकीनम् ।
जयारवः पौरमृगेक्षणानां प्रस्थानकालेऽश्वपतेस्सुतायाः ॥ ६०

आसूचयन्ती सुरभिस्सवत्सा सिद्धिं पथि प्रादुरभूत्पुरस्तात् ।
समस्फुरन्नेत्रमनेकवारं वामं, निमित्तान्यपराणि चासन् ॥ ६१

स्वश्रेयसं भावि विचिन्त्य तन्व्याः सोढ्वा वियोगप्रभवञ्च दुःखम्
प्रेम्णानुयन्तं विससर्ज कृच्छ्रात्पुरन्ध्रिवर्गं नगरान्तसीम्नि ॥

पद्मोल्लासकरो रथाङ्गमिथुनप्रेमाकरः श्रीकरः
प्रौढं सन्तमसं व्युदस्य जगतां क्षेमङ्करो भास्करः ।
सावित्र्या रमणीमणेः परिणयप्रस्थानमुद्वीक्षितुं
पूर्वाद्रेश्शिखरे बभौ स्वकिरणैस्सिन्दूरवर्णैस्तदा ॥ ६३

इति श्रीसतीविलासमहाकाव्ये मद्रास्थानकविश्री
कृष्णमूर्तिकविविरचिते
तृतीयस्सर्गः

ॐ

तत्सत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

चतुर्थस्सर्गः

हर्म्याणि वीक्ष्य मधुरस्वरवारनारी-
सङ्गीतभङ्गिमुखराणि नरेन्द्रपुत्री ।
नृत्यन्मयूरमिथुनैरुपशोभितानि
तत्तत्पुरीषु कुतुकादकृत प्रयाणम् ॥ १

हेमाभचम्पकमणीचकमेदुराणि
वापीषु वारिजमयीषु मराळयुग्मैः ।
माकन्दशाखिषु पिकैर्मरं रुवद्भिः
चेतोहराण्युपवनान्यचिरन्तनानि ॥ २

उत्तुङ्गशृङ्गनवरत्नगृहाङ्गणानि
वाचालितानि मणिपञ्जरकीरशावैः ।
द्वाराणि वारणगणैर्निविडीकृतानि
लक्ष्मीकटाक्षपरिपूर्णनिकेतनानाम् ॥ ३

पूर्णास्समो*पकरणैर्निविडा मनुष्यै-
रश्रान्तनर्तनभुवो हरिवल्लभायाः ।
सांयात्रिकैरविरला द्रविणोपपन्नै-
र्नित्योत्सवैरविकला अपि पण्यवीथीः ॥ ४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(* समस्सर्वपर्याऽयोत्र)

पद्माकरेषु सुरभीणि पयांसि तीर-
मन्दारपुष्पमकरन्दनिपातनेन ।
स्वैरं विहर्तुमभितो युवतीस्स्वकान्तै-
स्स्नानोचितानि वसनानि च संवसानाः ॥ ५

(पयांस्यभितइत्यन्वयः)

शान्तानि चाश्रमपदानि तपोधनानां
स्रोतांसि पुण्यसरितां गिरिनिर्झरांश्च ।
क्षेत्राणि किल्बिषहराणि, महीधराणां
वल्लीनिकुञ्जपरिरञ्जितकन्दराणि ॥ ६

(सर्वेषामेषां, वीक्ष्य कुतुकादकृत प्रयाणमिति पूर्वेणान्वयः)

सस्मार नैव पितरौ न च बन्धुवर्गं
नालीजनं न च मनागुपमातृवर्गम्
तत्तद्विशेषपरिदर्शनलालसेत्थं
नेतुं स्वकालमपि कृत्स्नमियेष सेयम् ॥ ७

सर्वत्र राजमहिलाभिरुपेत्य कामं
प्रेम्णा सदक्रियत सा नगरेषु सुभ्रूः ।
एनां विलोक्य रमणीमणिमिन्दिराभां
गर्वं स्वकीयमजहुस्सहसा पुरन्ध्र्यः ॥ ८

तस्याः प्रयाणफलमालिमुखेन सर्वा-
विज्ञाय राजवनिता निरणैषुरेवम् ।
लोकत्रयेऽप्यनुगुणो रमणो रमण्या
अस्या नचास्ति न भविष्यति चित्रमेतत् ॥ ९

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शाटीकुटीरमभितोऽवनिभृत्कुमाराः
संभूय पञ्चविशिखस्य शरैः प्रविद्धाः ।
निश्श्वस्य दीर्घमसकृद्विफलप्रयत्ना
गात्रेण केवलमहो ! स्वपुराणि जग्मुः ॥ १०

राजात्मजेषु झषकेतनसान्निभेषु
तस्या न रक्तमभवद्धृदयं विदुष्याः ।
ज्योत्स्ना कथञ्चिदपि रज्यति नाब्जषण्डे
लक्ष्मीविलासवति कोऽत्र निदानवित्स्यात् ॥ ११

उज्जृम्भमाणनवयौवनभास्वराङ्गीं
ज्योतिर्मयीं नयनशक्त्यभिभाविनीं ताम् ।
उत्पश्यतां हृदयरङ्गतलेषु यूनां
चिन्ताख्यवारवनिता ननृतुर्यथेच्छम् ॥ १२

सङ्क्रन्दनोपमनरेन्द्रसुतास्स्मरार्ता-
स्तद्गर्भदासपदवीं मनसाधिरूढाः ।
सावित्रि! भृत्यमव मामिति सल्लुँपन्त-
स्सेष्यैरवापुरवहेलनमात्मदारैः ॥ १३

एणीदृशस्तरलतारकमीक्षणं य-
च्छ्रोणीभरेण यदपि क्रमणस्य मान्द्यम् ।
यानि स्वभावमधुराणि विचेष्टितानि
कामातुरैस्स्वविषयं तदमीभि सर्वम् ॥ १४

Digitized by IKS-MPE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पौरस्त्रियः प्रतिदिनं समवेक्षमाणाः
क्षीरार्णवस्य दहितुर्जयिनीमयत्नात् ।
ईर्ष्याविलेन मनसा कति वा न चक्रुः
श्वासानिलेन मुकुराणि मलीमसानि ॥ १५

उत्थाय पङ्कजकुलस्य विकासतः प्राक्
स्नात्वान्वहं शुभपयस्सु सखीसमेता ।
कृत्वा कुमारगुरवे प्रयता सपर्यां
पुष्पैस्स्रवन्मधुभिरुत्पलदृक्प्रतस्थे ॥ १६

लावण्यनिर्झरचरन्निजदृग्झषाणां
यूनां स्मरज्वरमनश्वरमारचय्य ।
साचित्रयसौ प्रतिपुरं विमनायते स्म
प्राणेश्वरस्य परिमार्गणतः श्रमेण ॥ १७

संमोहनौषधिरशेषनृपात्मजानां
क्रान्त्वाखिलामि नगराण्यनवाप्तकामा ।
शुश्रूषयैव फलसिद्धिमृषीश्वराणां
निश्चित्य वृक्षनिबिडं प्रययावरण्यम् ॥ १८

छायाद्रुमैः कवचितेषु तमोवृतेषु
कान्तारवर्त्मसु दिवापि परिभ्रमन्ती ।
कीर्णा मनोज्ञहरिणैर्मुनिपर्णशालाः
प्रापन्नरेन्द्रदुहिता स्वजनैस्समेता ॥ १९

Funding by IKS-MoE

BVBSSMV
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूमौ निपत्य वियतः पुरतश्चरन्तीं
विद्युल्लतामिव तमःप्रसरं हरन्तीम् ।
भङ्क्त्वा समाधिमृषयो बत ! निर्विकल्पं
चित्रार्पिता इव समैक्षिषतानिमेषम् ॥ २०

हस्ताः कमण्डलुयुता, भसितैस्सितानि
गात्राणि, मूर्धसु जटाश्च पिशङ्गवर्णाः ।
एणाजिनानि वसनानि तपस्वियूनां
चेतांसि केवलमनङ्गशरार्दितानि ॥ २१

विज्ञाय मद्रनृपतेर्दुहितेति तन्वीं
प्रीत्यान्वयुञ्जत पुरे कुशलं मुनीशाः ।
सर्वे वयं कुशलिनो भवतां प्रसादा-
द्राज्यं सुभिक्षमिति सोत्तरयन्त्यनंसीत् ॥ २२

आपूरयिष्यति तवेप्सितमिन्दुमौलिः
कीर्तिं परामुपगमिष्यसि शाश्वतीं त्वम् ।
इत्येवमाशिषमृषिप्रवरा यथार्थां
प्रायुञ्जत, क्षितिभृतोऽपि कुमार्यहृष्यत् ॥ २३

कृत्वा पृथग्वसतिमात्मपुरस्सराणाम्
एणीदृगालिभिरसौ मुनिधर्मदारैः ।
आन्तःपुरीयदुटजे, तनुजाविशेषं
नक्तन्दिवं हितपरैरपलालयाना ॥ २४

BVBSSMV

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(° अधिकरणाच्चेति क्यच्)

सा सन्ददर्श शशशावकधावनानि
सङ्क्रीडनानि परितो हरिणार्भकाणाम्
आपूरणं शुकचयैस्तरुकोटराणां
धान्यै, र्मयूरमिथुनोल्वणलास्यरीतीः ॥ २५

कारीषवह्निमभितो मुनिबालकाना-
मह्नो मुखेऽध्ययनतश्शयनं जिहाना ।
सावित्र्यसौ स्वभवने प्रतिबोधनार्थं
तद्वन्दिगीतमपि साधु न मन्यते स्म ॥ २६

सा यामिनीशवदना मुदमैदमेयां
सन्दर्शने नगरदर्शनतो वनानाम् ।
येषूल्लसन्ति हृदयं परिरञ्जयन्तः
सर्वेऽप्यकृत्रिमतया सुभगाः पदार्थाः ॥ २७

कांश्चित्तपोधनवरान्विविधासनस्था-
नन्यानधोमुखतयापि च लम्बमानान् ।
कल्पान्बहूनपि समाधिमनुज्जिहाना-
न्सावित्र्युदीक्ष्य सुतराञ्च विसिष्मियेऽसौ ॥ २८

आचार्य भैक्षमृषिसद्मसु, सुद्गरूणा-
मादाय संमतिमथ स्वयमश्नुवानान् ।
शुश्रूषयैव परया क्षपितात्मकाला-
न्विद्यावतस्सुकृतिनस्सुतनूरपश्यत् ॥ २९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भस्मत्रिपुण्ड्रलसितांश्च गृहीतदण्डा-
न्मौञ्जीयुजोऽजिनधरान्पठतश्च वेदान्।
स्नेहोर्मिलेन निजदृग्युगलेन बाला-
न्स्कन्दोपमानपिबदिन्दुमुखी मुनीनाम् ॥ ३०

सैषा च मस्करिवरान्गृहिणां गृहेषु
मिष्टान्नवत्सु, रसवत्प्रतिषिध्य भोज्यम्।
स्वीकुर्वतः क्षुदुपहत्यवधि, प्रमोदा-
दाशीर्वचांसि गदतः प्रणनाम भक्त्या ॥ ३१

पर्णाशनानबशनान्पवनाशनांश्च
धन्यांस्तृणीकृतमहेन्द्रपदान्प्रबुद्धान्।
प्रारब्धकर्मफलमात्रमिहाश्नुवाना-
न्मुक्तान्क्षितीश्वरसुतान्वहमस्तुवीत ॥ ३२

सप्ताधिकान्दश पशून्क्वचिदालभन्ते
पात्नीवतं पशुवरं क्वचिदुत्सृजन्ति।
ब्रह्मात्मतत्वमपरत्र विचारयन्ति
वीक्षेऽखिलं सुकृतिनीति सुकेश्यनन्दत् ॥ ३३

घ्राणं स्म तर्पयति तत्र हुताज्यगन्धः
दृग्भ्यामरोचत मखस्सकलः प्रशस्तः।
तत्वार्थसंव्यवहृतिस्सफलीचकार
कर्णौ च मद्वनपतेर्दुहितुर्विदृष्याः ॥ ३४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेष्वाश्रमेषु वसतां महतां प्रभावा-
द्वन्येष्वदर्शि न मृगेषु विरोधभावः ।
एणार्भकं क्षुधितमुज्झितमात्ममात्रा-
स्तन्यं स्म पाययति पञ्चमुखी दयार्द्रा ॥ ३५

गर्ते निपत्य महति क्वचिदुद्रुदन्तं
कण्ठीरवं करिवरः कृपयोज्जहार ।
सोढ्वातपं स्वयमहो ! फणिनः फणाभि-
रावृण्वते स्म पृथुकान्नकुलीप्रसूतान् ॥ ३६

जम्बूफलानि गलितानि पचेलिमत्वा-
दातन्वताच्छसलिलान्यरुणच्छवीनि ।
शैलेन्द्रकन्दरपथात्सरयं वहन्त्या
धुन्या निमज्जदिभराजविराजितायाः ॥ ३७

कुञ्जेषु गुञ्जदलिभिः परिरञ्जितेषु
पुष्पोद्गतैः परिमलैर्निचुलीकृतेषु
संफुल्लमल्लिपरिकल्पिततल्पकेषु
भिल्लाः पुरन्ध्रिभिरकुर्वत मारकेलिम् ॥ ३८

अप्सु प्रतप्तरजतद्रवसन्निभासु
संफुल्लनीलकमलावलिकोमलासु ।
मन्दानिलोद्धततरङ्गपरम्परासु
स्त्रीभिर्विजह्रुरमरा गिरिनिर्झराणाम् ॥ ३९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पाटीरकोटरविनिर्गतभोगिरत्न-
ज्वालावलीकवलितासु वनस्थलीषु ।
निश्चक्रमुर्न चकिता दिवसभ्रमेण
मूकाश्च घूकनिकराः क्षुधिताः क्षपासु ॥ ४०

कान्तारपद्धतिषु कृत्रिमगर्तसत्व-
शङ्काकलङ्कितहृदः करिणः प्रवृद्धाः ।
स्थाणून्मुहुः करधृतान्भुवि निक्षिपन्तः
नक्तं चरन्ति कलभैरनुगम्यमानाः ॥ ४१

पाटीरमेदुरमहाद्रिपयोधराढ्यां
ज्योत्स्नांशुकां गिरिसरिद्रशनासनाथाम् ।
पुष्पोद्गमेन सुभगां विपिनान्तलक्ष्मी-
माश्लिक्षदिन्दुरमृतप्रकिरैः करैस्स्वैः ॥ ४२

व्यालोलकुन्तलभरं विगलद्दुकूलं
भ्रश्यन्नितम्बरशनं शयनात्प्रबुध्य ।
काचिद्द्वितीयसुरतं रमणेऽर्थयन्ती
हा! हन्त! कुक्कुटरुतैर्विषसाद भूयः ॥ ४३

(रशनान्तानि त्रीणि प्रबोधक्रियाविशेषणानि)

नीडोदरेषु विहगा व्यरुवन्मनोज्ञं
म्लानप्रभामविभरुस्सुरतप्रदीपाः ।
संप्रावदन्धुतमुखाः कृकवाकुसङ्घाः
रोचींष्यनुष्णकिरणं दिवि चाप्यपुष्णन् ॥ ४४

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उन्मीलनोन्मुखसरोजविराजितायां
मुन्निद्रहंसमिथुनैरुपशोभितायाम् ।
जप्त्वाघमर्षणमृषिप्रवरा झरिण्यां
सस्नुर्देवस्पतिदिशङ्गतवत्यनूरौ ॥ ४५

पीयूषकल्पमकरन्दमिलद्रजांसि
नीहारसीकरकरम्बितकेसराणि
प्रत्यूषशीतपवनेरितपादपेभ्यः
पुष्पाणि वृन्तगलितान्यपतंस्तटिन्याम् ॥ ४६

अभ्रङ्कषाद्रिजमहौषधिसारमिश्राः
स्रोतस्विनीरमृतसोदरनीरपूराः ।
आवर्तचक्रपरिवर्तितपाटलौघाः
वामभ्रुवस्समभजन्त तपोधनानाम् ॥ ४७

बध्वाञ्जलिं कमलकोशनिवेशेन मूर्कै-
र्वाचंयमत्वमलिभिस्स्वयमावहन्ती ।
अम्भःकणाश्रुवदना दयितं तपस्वि-
न्यालोकितुं समुदकण्ठत पद्मिनी द्राक् ॥ ४८

त्वत्कान्तिलेशमुपजीव्य निशि भ्रमद्भि-
श्चन्द्रादिभिर्दिगुपभुक्तचरी मघोनः ।
पूतात्मनः किमुचिता विहृतिस्तयेति
प्रोद्यन्तमर्यमणमम्बुजिनी जहास ॥ ४९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संरक्ष्य नक्तमधिकैरवगर्भमिन्दु-
स्संवेशितां श्रियमनिद्रसहस्रपत्रे ।
प्रत्यर्पयन्सवितृमण्डलमध्यवर्तिं-
पुंसे, क्रमेण कृतकृत्यतया तिरोभूत् ॥ ५०

गीतिं मुदा मधुकरीषु वितन्वतीषु
हंसीषु पक्षपुटताडनतोऽप्सु तालान् ।
तीरद्रुमेषु विकिरत्सु सुमान्यभीक्ष्णं
लक्ष्मीर्ननर्त सरसीरुहरङ्गधाम्नि ॥ ५१

प्रत्यग्रपुष्पफलमूलसमित्कुशादि-
वन्योपहारनिकरैर्मुनिसार्वभौमान् ।
सावित्र्यपि प्रतिदिनं सहिता सखीभि-
रप्रेरिताप्युपचचार विनीतिनम्रा ॥ ५२

स्वादून्यरण्यसुलभानि फलानि जग्ध्वा
पीत्वा पयःप्रसृमरं सरसं सरस्याः ।
मध्येऽद्रि राजतनुजा पिकसारिकाढ्य-
मध्यास्य कुञ्जभवनं पवनं सिषेवे ॥ ५३

नोदेति नास्तमयते परमार्थतो यो
लोकान्सृजत्यवति संहरति प्रभावात् ।
द्रष्टा च यस्सुकृतदुष्कृतयोस्समेषां
मित्रःक्रमात्स भगवानजहात्स्वतापम् ॥ ५४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मिन्क्षणे द्युमणिरैन्धतरां प्रतीच्या
संरक्तया कनककेतकदाम दत्तम् ।
धृत्वेव काननमनोकहसङ्कुलं त-
त्तन्वन्पिशङ्गमभितः प्रकरैः कराणाम् ॥ ५५

प्रक्रान्तचाटुवचनाः प्रणदद्भिरेफैः
पुष्पोद्गमैश्च रुचिरैः कृतमन्दहासाः ।
रम्यैः प्रवालनिकरैरनुरागपूर्णाः
पर्यष्वजन्त लतिकास्सहकारवृक्षान् ॥ ५६

चिक्रोडकार्धपरिजग्धफलाम्रसाला-
न्स्कन्धैर्भुवं तृणमयीं स्पृशतस्समन्तात् ।
मद्राधिनाथतनया निकषा लताभ्यः
पुष्पाण्यपाचिनुत सा मृदुलाङ्गुलीभिः ५७

(रसालान्निकषेत्यन्वयः)

तस्मिन्क्षणे कमपि मूर्तमिव प्रभावं
कन्दर्पदर्पहरविग्रहमप्रधृष्यम् ।
वक्षस्स्थलं विपुलमादधतं प्रवीर-
श्रीरङ्गधामनवरत्नकवाटकल्पम् ॥ ६८

नागाधिराजभुजगोयुगमत्युदारं
श्रुत्यन्तसंस्तवपरायणदृग्विलासम् ।
उन्निद्रकोकनदपाणितलं वृषाग्र-
स्कन्धं महेश्वरकुमारमिव स्फुरन्तम् ॥ ५९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुंसामपि स्मरविकारमुपैधयन्तं
हिंसानभिज्ञमनवद्यगुणैकसिन्धुम् ।
कंसारिमन्यमिव धर्मरतं विशुद्ध-
हंसानुपास्य विमलां मतिमावहन्तम् ॥ ६०

नीहारदीधितिमुखं यमिनां वरेण्यै-
र्देहाभिमानरहितैरपि लाल्यमानम् ।
हाहामुखामरवरस्तुतरूपधेयं
माहाकुलं तरुणमर्यमकोटिदीप्रम् ॥ ६१

क्षत्रार्हवृत्तमपि भाग्यविपर्ययेण
पित्रान्धतामुपगतेन परैरसद्भिः ।
सत्राटवीमधिवसन्तमरीन्निगृह्य
छत्राधिपत्यमधिगन्तुमिव ज्वलन्तम् ॥ ६२

(सत्रा + साकं । एतत्पित्रेत्यनेनान्वेति)

पुञ्जीभवन्तमिव विक्रमसारमेकं
सञ्जीवनौषधमिवर्तिमतां जनानाम् ।
मञ्जीरमञ्जुचरणाप्सरसश्च साल-
भञ्जीकरिष्णु शुभलक्षणमादधानम् ॥ ६३

सत्यात्पथः कथमपि च्यवते न यस्मा-
त्तत्सत्यवानिति भुवि प्रथितं स्वनाम्ना ।
एण्यङ्गकानि सदयं सहकारमूले
संवाहयन्तमवनीन्द्रकुमारयदशात् ॥ ६४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* अन्यत्रदृष्टिमुपलक्ष्य मृगीं सशङ्कः
पश्चान्निवृत्तवदनस्तरुणोऽपि सद्यः ।
विद्यां परामिव सतीं पुरतस्स मूर्तां
ज्योतिर्मयीं नृपसुतां निभृतं लुलोके ॥ ६५

(* अन्यत्रदृष्टिमिति बहुव्रीहिर्मृग्या विशेषणम्)

अप्यर्धचन्द्रमुकुटं भुवनैकनाथ-
मर्धं पुमांसमकरोत्कुसुमैरवन्ध्यैः ।
वीराग्रणीस्स मदनो युवतेश्च यूनः
* प्रेन्वाञ्चकार हृदयं युगपत्तदानीम् ॥ ६६

(* प्रेन्वाञ्चकार + प्रीणयामास)

म्लानश्चिरेण सुदृशो हृदयप्रसूनं
प्रेमामृतार्द्रमजनिष्ट विकासि सद्यः ।
तस्याःस्मरेण च निसर्गत एव रम्या
मानोज्झकं नवमभाद्रमितेव लज्जा ६७

सेयं तिरश्च्यपि मृगी स्तवनीयभाग्या
जातार्यपुत्रकरकोकनदेन मन्दम् ।
संमृद्यते ह्यसुलभेन नरेन्द्रपुत्र्याः
पुण्यैर्विनापरिमितैरिति, साप्यमंस्त ॥ ६८

निर्जित्य मुग्धमधुरार्द्रविलोकितेन
यत्नादृते हरिणयोषितमानतभ्रूः ।
तेनैव मामपि विमोहयितुं प्रवृत्ता
का वा भवेदियमिति व्यचिचिन्ततासौ ॥ ६९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सावित्र्यभिख्यमचिरत्नमनर्घरत्नं
प्रत्युप्य सत्यवति हेम्नि महामहिम्नि ।
नाडिन्धमोऽभवदवाप्तुमिवोरुकीर्तिं
गौरीपतौ मनसिजः प्रथितप्रभावः ॥ ७०

आकृष्टवान्हृदयमद्य मदीयमेष
* निर्द्वापरं धरणिभृत्सुत एव चिह्नैः ।
कस्मात्पुनर्निवसतीह वने,ऽथवैत-
द्वैचित्र्यमेव नियतेरिह मां नयन्त्याः ॥ ७१

(* निस्संशयम्)

अन्योन्यभिन्नविषया बहिरिन्द्रियाणां
नैवास्फुरन्प्रियविलोकनयोश्च यूनोः ।
पश्चात्परस्परगतोऽस्तमितोऽपि भेदो
भूम्न्यान्तरश्च करणं सुख एव लिल्ये ॥ ७२

सक्तां रसाहरणकर्मणि राजपुत्र-
हस्तारुणाम्बुजपरिग्रहणार्हलक्ष्मीम् ।
स्वात्मैकगुण्यवरमार्गणसंविहारां
मौर्वीमिवाहितहरां कलयेऽहमेताम् ॥ ७३

(श्लिष्टपद्यमेतम्)

सार्थं जगत्त्रयमजन्यनयैव सत्यम्
एनां सृजंश्च मदनस्स यथार्थनामा ।
अस्या * गतं वनमिदं भुवनं समस्तं
साफल्यमद्य मम जन्मन आविरासीत् ॥ ७४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(* अधिकरणेक्तः)

दृष्टा ह्रियावलितकन्धरबन्धुरेयम्
आवृत्य हृद्यतरवक्त्रसहस्रपत्रम् ।
शश्वच्छ्रुतिप्रणयिना दृगपाङ्गदाम्ना
बध्नाति हन्त ! जनमेनमरालकेशी ॥ ७५

(* कन्धरशब्दः पुल्लिङ्गोऽपि)

जिज्ञासते मम नतभ्रुवमन्तरात्मा
पुष्पैस्सहाहृतमनस्कतया किसालम् ।
आचिन्वतीं, हृदयगं विशदानुरागं
स्निग्धाङ्गुलीभिरिव दर्शयितुन्नु मह्यम् ॥ ७६

स्वैरं सरन्ति सरसास्सरसीरुहास्य
मस्याः प्रसूनविरसाः परितस्स्वरन्तः ।
दूरीकृता अपि वरैश्चिकुरैर्द्विरेफाः
नोजि ह्रियत्यह ! तथापि तु ते कृतार्थाः ॥ ७७

* तावत्तयाद्य यदि भाषितुमारभेय
सान्तर्दधीत सहसा त्रपया महत्या ।
तत्किं सहेय नयनामृतचन्द्रिकाया-
स्तस्मान्मदीयहृदयागमयस्व तावत् ॥ ७८

(* तावत्प्रथमम् । आगमयस्व + क्षमस्व मात्वरिष्ठा इत्यर्थः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकैकमङ्कमनङ्गदमङ्गनाना-
मप्येणशावकविलोलविलोचनायाः ।
चक्षुर्विशिष्य झषकेतनतन्त्रतत्व-
सारं क्रमादुपदिदिक्षति मह्यमस्याः ॥ ७९

दृष्टा मया च विनिवृत्तमुखोषधीशा
पुष्पाणि नीलजलजीकुरुतेऽक्षिपातैः ॥
अन्यत्रदृग्यदि भवेयमियं तदा तै-
रापादयत्यभिनवाम्बुधरोपमं माम् ॥ ८०

शृङ्गारदुग्धजलधेर्नु समुद्धृता स्या-
त्सैषानघामृतलहर्यचिरात्स्मरेण ।
लावण्यसद्द्रविणशेवधिदेवता वा
श्रीणां समग्रिरथवेयमपूर्वसृष्टिः ॥ ८१

प्रभ्वी प्रभङ्कुमवलेपभरं कवीनां
सुभ्रूरवाङ्मनसगोचररूपधेया ।
यैर्मोहयत्यतितरामिह मामियं सा
सञ्जीवयत्यहह ! तैर्मधुरैः कटाक्षैः ॥ ८२

उर्वीभृतां कति न दृष्टचराः कुमार्य-
स्तासु, व्यकृष्यत न मे हृदयं कयापि ।
यद्रज्यतीह, तदियं च परिग्रहार्हा
प्रत्यक्षसाम्यमयतेऽनुमितिस्सतां हि ॥ ८३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ह्यास्ये कथं वरतनोश्चरितं समग्र-
मित्याकुलीभवति सत्यवति क्षणेन ।
पारेण नावमनुकूलतमेव वात्या
प्रादुर्बभूव वत ! योजयितुं वयस्या ॥ ८४

वेत्तीह वृत्तमियमन्तरिता लतासु
सर्वं, तथापि चतुरास्त्यविजानतीव ।
इत्याकलय्य परतन्त्रतरं त्रपाया-
स्सर्वस्वमैन्ध भृशमश्वपतेस्तदानीम् ॥ ८५

॥ इयं + सखी ॥

इति श्रीसतीचरितमहाकाव्ये मद्रास्थानकवि
श्रीकृष्णमूर्तिविरचिते
चतुर्थस्सर्गः

ॐ

तत्सत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

पञ्चमस्सर्गः

अथ प्रियायाः पुरतः कृतोदयां
दयामिवैकां स गृहीतविग्रहाम् ।
सखीं द्युमत्सेनसुतो ददर्श तां
विशुद्धहृद्भक्तिमिवात्मसंविदः ॥ १

कलावती नाम सखी नृपात्मजां
विलोक्य लावण्यझरोर्मिमालिनीम् ।
तदा दरस्मेरमुखेन वाग्मिनी
ह्रिया विनम्रां निजगाद सादरम् ॥ २

सरस्वता सङ्गमवाप्तुमुद्यता
सरिन्निरुद्धा किमु सेतुनानघे ! ।
कुमुद्वतीं श्लेष्टुमनाः कलानिधि-
र्न्यषेध्यकस्मात्स्तनयित्नुनाथवा ॥ ३

अयं हि सामान्यत एव रक्षिता
प्रजेशपुत्रस्समुपस्थितः पुरः ।
भिया तवालं नवमन्मथोदया-
मुपेक्षितुं रक्तहृदेष न प्रभुः ॥ ४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परस्परप्रेमनिरर्घताञ्च वां
कथं न पश्यामि सखी समानसा ।
त्वयार्धभारो व्यपनीत एव मे
लता हि सक्तानुगुणं द्रुमं स्वतः ॥ ५

तवानुकूलं कलये विना श्रमं
यतो युवायं त्वदधीनतां गतः ।
उपायलेशस्समयोपकल्पितः
फलोदयायालमराळकुन्तळ ! ॥ ६

प्रभावतीं वीक्षितुमप्यनीश्वराः
तनूं तवेमां नरपालसूनवः ।
किमेतदित्याकुलमानसा ययुः
यथागतं त्रस्तमृगायतेक्षणे ! ॥ ७

उपस्थितं कालमवेहि, शुक्तिका-
ममूल्यमुक्ताफलजालगर्भिताम् ।
विधातुमेकं शुभतारकोदयं
घनोऽनघःकाङ्क्षति दिव्यविग्रहाम् ॥ ८

अयश्शलाका सखि ! कान्तसन्निधौ
स्वतो विकुर्वीत परं न कारणम् ।
अहं च सान्निध्यसुरक्षणोचिता
वतान्तरायोऽभवमन्तरा हि वाम् ॥ ९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृगाक्षि ! कल्याणमतिं क्षमस्व मां
समुत्सहे साधयितुं समीहितम् ।
नृपात्मजो लक्ष्मभिरेष लक्ष्यते
पुरास्यवेद्भ्याशयमन्तिकोक्तिभिः ॥ १०

ह्रियाभ्यनुज्ञां ददतीं शुचिस्मितां
कलावती द्राक्परिरभ्य सादरम्
विलज्जयन्ती क्रमणैर्मरालिकां
अदर्शि सा सत्यवतः पुरः क्षणात् ॥ ११

चपुष्मती कापि विनीतिरेत्य तं
स्मितेन चित्राश्वमहस्करप्रभम् ।
वशं नयन्तीव मनोज्ञविभ्रमा
कराम्बुजाभ्यां निबबन्ध साञ्जलिम् ॥ १२

अनामयं पूर्वमतः परं जयं
निरञ्जनस्सख्यनुयुज्य सा पदैः ।
जगाद तं स्वागतमात्तकौतुकं
गिरातिमृद्या स्वतनोरपि प्रधीः ॥ १३

भवन्तमासाद्य तपःफलं परं
परन्तप ! स्तः पितरावधिक्षिति ।
महात्मनां कौ धुरि कीर्त्यतां गतौ
मनो विशेषग्रहणेऽभिलाषि हि ॥ १४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तपस्विवेषोऽन्यथयत्ययं न ते
सुराजचिह्नं नवपुष्पधन्वनः ।
हविर्भुगूर्ध्वज्वलनं धुवन्नपि
प्रभञ्जनः कर्तुमधो हि न प्रभुः ॥ १५

विधेर्विलासेन विनाकृतास्त्वया
प्रजाश्च कस्मिन्विषये हितैषिणा ।
यदद्य राजन्वदिदं तपोवनं
रघूत्तमेनेव चकास्त्यभिख्यया ॥ १६

न रूपमाकर्षति योषितः परं
तवाद्य यूनोऽपितु पूरुषानपि ।
अनुप्रविष्टोऽखिलहृत्स्विव स्वभूः
स्फुरस्यधृष्यः कथमप्यरातिभिः ॥ १७

अरण्यभागानसहाय एव स-
न्ननेकपाद्यध्युषितानहर्दिवम् ।
निजानुभावेन परीतवत्समैः
चरस्युदीतार्कसहस्रसप्रभः ॥ १८

तृषार्दिता कापि चकोरिका त्वया
कृता नु किं तृप्तिमती सुधांशुना ।
दृषद्वन्त्यास्त नु सन्निधापिता
न वेत्सि किं किञ्चिदसौ महिम्न्यवस्थितः ॥ १९

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृशाविमे मे तव रूपदर्शना-
न्न तृप्यतो यत्स्वसुहृत्तमे श्रुती ।
गृहीतवत्यौ न चरित्रनामनी
विभक्तसौख्यानुभवास्सखीजनाः ॥ २०

विशालवक्षस्स्थलरङ्गधाम्नि ते
स्पृहां परां श्रीर्विहृतौ निबध्नती ।
अपीतरस्या दुहितुः प्रजेशितु-
र्मदावकाशं प्रददावनीर्ष्यया ॥ २१

अपि द्रुमः पुष्पफलै स्समृद्धतां
गतो, लताश्लेषमृते न शोभते ।
नवाम्बुदो वा तटिता विनाकृतः
तथा सरित्सङ्गमुपेक्ष्य वारिधिः ॥ २२

किमस्ति पञ्चेन्द्रियतृप्तिसाधनं
विना वधूरत्नमनर्घमेकदा ।
अनाविलो दम्पतिभाव एव मे
समः पुमर्थः स्फुरतीति निश्चितिः ॥ २३

निसर्गरम्याः पुरुषाः प्रकीर्तिता
वधूजनाः कृत्रिमकामनीयकाः ।
विपर्ययं वेत्ति विमोहतो जनः
प्रमाणमस्मिंश्च मृगाः पतत्रिणः ॥ २४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सटाच्छटाबन्धुरकन्धरो हरिः
पुमानलं स्फोरयितुं स्वविक्रमम् ।
मतङ्गजो दन्तयुगेन रञ्जितः
शिखावलश्चारुतरश्च पिञ्छवान् ॥ २५

अनल्पलालित्यनिकेतनं स्वतः
चकास्ति च स्त्रैणमशेषमोहनम् ।
तदात्मसात्कर्तुमजस्रभावनं
क्रमेण पौंस्नं ववृधेऽङ्गयोगतः ॥ २६

मृगेक्षणावर्णननैपुणीजुषः
कवीश्वरा हन्त! तपस्विनां समे ।
मनांसि यूनामतिवेलचापलं
विकारयामासुरिवादृढात्मनाम् ॥ ३७

मतं तदेतत्परिणामवादिनां
निराचिकीर्षुः कतिचित्प्रजापतिः ।
अमानुषीसंशयदायिनीरपि
स्त्रियस्ससर्जेत्यहमाशयेऽधुना ॥ २८

यतस्सुरस्त्रीष्वपि वृत्रहादयो
न रेमिरे किन्त्वभजन्त मानुषीः ।
श्रुतं मुहुः किन्न भवादृशैरिदं
दिवौकसां ह्यभवत्सुमोहमो दमः ॥ २९

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विशेषतो रक्ष्यतया नृपात्मजाः
प्रदानतः प्रागसुखावहाः परम् ।
हरेः पदाब्जे विनियोजनादृते
शुचे महत्यै खलु संस्कृता गिरः ॥ ३०

नृपान्वयक्षीरपयोधिलक्ष्म्यसौ
सखी च साविद्यभिधान्यदुर्लभा ।
उपस्थिता त्वां पुरुषोत्तमं स्वयं
दयार्द्रहृन्नार्हसि तामुपेक्षितुम् ॥ ३१

इयञ्च मद्राधिपनन्दिनी वरं
स्वयं वरीतुं गुरुणा नियोजिता ।
भुवं भ्रमन्ती ह्यवृणीत पूर्णहृ -
द्भवन्तमम्भोनिधिमापगा यथा ॥ ३२

परस्परप्रेमविलोकनानि वां
विशङ्कयेषत्कलुषाण्यवेदिषम् ।
अतो विधातुं सफलान्यमून्यहं
गतान्तिकं ते कुशलैषिणी सखी ॥ ३३

हृदो हृदासङ्कुमनर्गळो जवा-
न्मिथोनुरागोऽन्यदपेक्षते कथम् ।
सखीस्वभावोऽयमनल्पचापलः
करोति मध्यस्थमिमं वृथा जनम् ॥ ३४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समक्षमृक्षेश्वरवक्त्र ! निस्त्रपा
ह्यभाषिषि स्वैरमनुत्तमस्य ते ।
तवेयमस्यास्त्वमितीह सङ्गति-
र्मनोज्ञतामेत्विदमेव वाञ्छितम् ॥ ३५

बयस्यता मे कृतकृत्यतामगा-
दृतेऽतियत्नाद्भगवत्प्रसादतः ।
विलोचनं सत्सफलं निमज्जय-
त्प्रमोदवार्धौ जनमेनमेधताम् ॥ ३६

कलावतीमेवमुदीर्य मञ्जुलं
दरस्मितेनात्मवशं वितन्वतीम् ।
विलोचनाभ्यां स पिबन्नृपात्मजः
प्रचक्रमे वक्तुमुदन्तमात्मनः ॥ ३७

पदैर्विशुद्धैर्म्रदिमैकधामभिः
परस्परश्लेषविशेषबन्धुरैः ।
रसध्वनिस्फोरितचित्तरञ्जनै-
रभाषथा योषिदवाप्य वैदुषीम् ॥ ३८

समाद्रियन्ते मधुरां गिरं परं
परे तु हृद्यामभिधेयसम्पदम् ।
इति प्रतिव्यक्त्यभिरुच्यनेकता
सुदुष्करं खल्वखिलानुरञ्जनम् ॥ ३९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुधारसोद्गारिगिरामयं क्रमः
प्रसादगाम्भीर्यनिधिर्वराङ्गि ! ते ।
विधाय हृत्कैरवजागरूकतां
सुधांशुवत्कस्य मुदे न कल्पते ॥ ४०

स्त्रियोऽपि ते मध्यमवृत्तिभव्यया
कृशाङ्गि ! रीत्येह गिरामुदारया ।
न मां परं मोहयितुं त्वमीशिषे
ब्रवीमि सत्यं जगतां त्रयीमपि ॥ ४१

उदासिता वासवसम्पदामपि
प्रवृद्धदुःखानुभवो विधेर्बलात् ।
तपस्विवृत्तिर्निवसन्वनेऽप्यहं
विमोहितोऽभूवमहो ! त्वयानघे ! ॥ ४२

सरस्वती योजयितुं स्वसेविनं
सुराजलक्ष्म्या मनुते तपस्विनम् ।
इदञ्च लोके भृशविस्मयावहं
विधेर्हि वैचित्र्यमशक्यवर्णनम् ॥ ४३

नृपस्य सर्वस्वमपश्यमुत्सुकं
यदा नवेऽस्तङ्गमिता धृतिस्तदा ।
अभूतपूर्वेयमधीनतामतिः
विकारयोगं सभगं करोति मे ॥ ४४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हृदि स्फुरन्तीमनुरागसम्पदं
सखीच्छलान्मेऽर्थकरीं पुरःस्थिताम्।
अवेत्य च त्वय्युदितात्मभावनः
वदाम्युदात्तप्रकृतिर्गतत्रपः ॥ ४५

नृपात्मजा त्वञ्च ममानघात्मनः
सुसाध्यतां साधनतां समर्हथः।
श्रियाञ्च वाण्यां विहितात्मसंस्कृतौ
विभेदमुत्पश्यतु कोऽत्र मूढ मूधीः ॥ ४६

अथाप्युदन्तस्य निवेदने भृशं
ममान्तरात्मा ह्रियमेत्यनिन्दिते !।
प्रकाशयोग्यां न निजामनुच्चतां
वदन्ति सन्तो हि सुहृज्जनेष्वपि ॥ ४७

अयञ्च सामान्यविधिर्विभाव्यतां
मृगाक्षि ! वक्ष्यामि ततश्च न क्षतिः।
हितैषिणि त्वादृशि दीव्यदुद्यमे
जने निगूह्यो विषयः कथं भवेत् ॥ ४८

सतीपतिस्साल्वपतिस्सतां पतिः
विशुद्धराजन्यकुलाब्धिकौस्तुभः।
परावरज्ञः परसैन्यनाशनः
प्रपन्नसर्वार्तिहरः परो हरिः ॥ ४९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्विषद्भुजश्च द्विषतां, जनार्दनो
निजाङ्घ्रिभाजां, यमिनां महेश्वरः ।
मनीषिणां गीष्पतिरर्यमौजसां
कविः कवीनां श्रयतां सरद्रुमः ॥ ५०

समग्रसत्क्षत्रियधर्मविग्रहः
स्मरः परः सत्यरतो महारथः ।
कृताश्वमेधः शतमन्युमानितो
द्विजाङ्घ्रिपाथोजमधुव्रतो व्रती ॥ ५१

परार्थमात्मार्पणकर्मणि प्रभुः
दधद्द्युमत्सेन इति प्रथां भुवि ।
वसुन्धरेशो वसुभिस्समोऽष्टभिः
त्रिविष्टपाधीश्वरवद्व्यभादसौ ॥ ५२

बलीयसीत्वान्नियतेरलङ्घ्यया
विचेष्टयास्तङ्गमितात्मवैभवः ।
परैरसद्भिर्गमितो बतान्धतां
वने सदारोऽस्ति मदेकपुत्रकः ॥ ५३

च्युतं स्वराज्यादुरुवार्धकश्रमं
दृगन्धमाधिव्यथितान्तरं गुरुम् ।
निनीषुमात्मीयमनेहसं समं
वनेऽत्र शश्वद्द्रुमादिभीषणे ॥ ५४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विधिस्समुन्मील्य दृशं दयार्द्रह-
त्कदा निरस्येदशुभं न वेद्म्यहम् ।
रिपावुदासे प्रतिकर्तुमक्षमः
द्विजातिवन्निष्फलकोपपावकः ॥ ५५

विपत्सरित्सागरमागसां निधिं
मदालसे ! ऽगस्त्यशतं न मां पिबेत् ।
दृशौ सुराजन्यतया न मुञ्चतः
श्रुधारामधरां च सर्वथा ॥ ५६

उपैति जीवन्तमनेकहायना-
न्मनुष्यमानन्द इतीह वाक्सताम् ।
स्मृतात्मनि प्रत्ययमातनोति मे
लभेय शान्तिं रिपुवर्गनिग्रहात् ॥ ५७

अपूर्वमुन्मेषमदा हृदो मम
स्फुराम्यहं नूत्नवदद्य भामिनि ! ।
समे विदुर्मां भुवि सत्यवानिति
प्रथापि चित्राश्व इति स्वकर्मणा ॥ ५८

अहं पितृभ्यां परवानथापि मा-
मुपेत्य सावित्र्यकृतात्मसाद्बलात् ।
जयेन्नु बालोऽप्यनुराग एष मे
चिराय नृणां गुरुभावितमोजसा ॥ ५९

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुखे प्रसादो वचसीव तेऽच्छता-
मभिव्यनक्त्यात्मनि मञ्जुभाषिणि ! ।
विभासि सिद्धौषधिरीदृशस्य मे
तपःफलं कापि नु कल्पवल्लरी ॥ ६०

तिरोहिता ह्यन्वभवश्शुभेच्छया
द्वयोश्चनौ सङ्गतयोर्विचेष्टितम् ।
तदद्य मां ह्रेपयति स्मृतिङ्गतं
ब्रुवे लघुत्वं मयि नैव शङ्क्यताम् ॥ ६१

इतीरिताकूतमवाङ्मुखी ह्रिया
पदाङ्गुळीभिर्विलिखन्त्यसौ भुवम् ।
क्षणान्निजस्नेहरसोर्मिलेक्षणै-
र्निबध्य, भेजेऽश्वपतेस्तनूद्भवाम् ॥ ६२

अयं द्युमत्सेन इति प्रसिद्धयतः
प्रियात्मजस्साल्वपतेर्महात्मनः ।
अनूढभार्यश्शुभलक्षणो युवा
गुणाकरोऽस्त्येकरसस्सखि ! त्वयि ॥ ६३

इमे गुणा एव महद्धनं हि नः
परं न काङ्क्ष्यं नच तावता क्षतिः ।
मनोरथस्सत्पथचारितस्त्वया
बभाज लक्ष्यं कुशलोदयास्पदम् ॥ ६४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रमात्पुरा वेत्स्युपसर्जनं परं
निमित्तमात्रं ह्यहमासमत्र वाम् ।
अथाप्यभूवं सुकृतिन्यसंशयं
यतो गता मे भवती वयस्यताम् ॥ ६५

निकुञ्जपुञ्जे परिरञ्जिते सुमै-
र्वने स्फुरच्चन्द्रिकयातिसुन्दरे
प्रियङ्करे च त्रिगुणे समीरणे
झषध्वजे स्वैरमधिज्यधन्वनि ॥ ६६

त्वया समं वर्तितुमत्र नोत्सहे
यतस्तव त्राणकृदत्र तिष्ठति ।
कदापि सावित्रि ! निजेङ्गितज्ञतां
जहाति न स्वार्थपराङ्मुखो जनः ॥ ६७

उदीर्य चेत्थं चलितुं कृतोद्यमां
कलावतीं मद्रजनाधिपात्मजा ।
विकृष्य गुञ्जन्मणिमेखलं जवात्
हसन्मखी स्वादु जगाद कोविदा ॥ ६८

द्वितीयवर्णार्हमिति प्रसिद्धम-
प्यपित्रनुज्ञातमवैधमेव नौ ।
विभाति गान्धर्वविधानमद्य ते
बतान्यथाभून्मदिराक्षि ! काङ्क्षितम् ॥ ६९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निसर्गधीरोन्नततां स्त्रियाः कृते
कथं जिहासेत्सखि ! चिन्त्यतामिदम् ।
विकारयेन्नैव सरिन्महोदधिं
क्षमाञ्च बह्वीमधिगम्य सश्रमा ॥ ७०

अन्योन्यालापमल्पप्रतिभणितमभिव्यक्तमन्दाक्षमादौ
उत्थाप्यात्मप्रयत्नैरथ सरसगिरि स्वेच्छयाप्युद्यतौ तौ ।
मूर्तौ दृष्टवानुरागाविव मुदितमना दम्पती सा वयस्या
रात्रिं कृत्स्नामपि द्राङ्निजचतुरिमभिर्यापयामास रम्यैः ॥ ७१

इति श्रीसतीचरितमहाकाव्ये मद्रास्थानकविश्री-
कृष्णमूर्तिकृते पञ्चमस्सर्गः
॥ ॐ तत्सत् । ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

षष्ठस्सर्गः

अथ सिंहासनासीनं
अन्यूनं पाकशासनात् ।
नृपमश्वपतिं प्राप-
न्नारदो भगवानृषिः ॥ १

भासावकाशानाशानां
तिरस्कृतविकर्तनः ।
व्याप्नुवन्नप्रमेयात्म-
महिम्नि समवस्थितः ॥ २

दृक्छक्तिं पश्यतां निघ्न-
न्यकुर्वन्विद्युतां ततिम् ।
तेजसामेकपुञ्जोऽसौ
बाह्यान्तरतमोऽर्यमा ॥ ३

नवरत्नोर्मिकादीव्य-
दङ्गुलीभिस्स्ववल्लकीम् ।
आस्फालननिभात्कण्ठ-
माधुर्यं योक्तुमर्हयन् ॥ ४

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्ध्याधाराधरोष्णीषं
तुषारगिरिमीश्वरः ।
अनुकर्तुं जटाजूटै-
रच्छस्फटिकविग्रहः ॥ ५

हैममम्बरमाविभ्र-
त्कटिरञ्जितमौञ्जिकः ।
कृष्णाजिनोत्तरीयेण
स्फुरन्पुरहरोपमः ॥ ६

अङ्गुष्ठतर्जनीभ्यां स्व-
हस्तैर्मल्यमुदारधीः ।
परीक्ष्य स्फटिकाक्षेभ्यः
स्रग्गतेभ्यो दिशन्निव ॥ ७

हिमाद्रौ दूरतो दृश्यं
स्रोतो गाङ्गं दरानृजु ।
धरन्यज्ञोपवीतं द्रा-
ङ्न्यत्स्मृतिपथं रुचा ॥ ८

भृङ्गभ्रमकृदक्षुद्र-
रुद्राक्षस्रङ्मनोहरम् ।
अमन्दमकरन्दार्द्रं
सुमदाम गले दधत् ॥ ९

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समुद्गूढशिखण्डैक-
मण्डनप्रसवस्रजा ।
प्रत्येकश्रियमस्तोकं
हरन्निन्दुकलाभृतः ॥ १०

सौन्दर्यदेवतां भ्रान्तां
प्रत्यङ्गं तुङ्गनर्तनैः ।
उपवेशयितुं फालं
फलकं कल्पयन्निव ॥ ११

निष्टप्तहाटकश्रीके
ललाटफलकेऽलकैः ।
न्यञ्चितैः कुञ्चितैः कान्ते
ललामोल्लासयन्नलम् ॥ १२

माधुरीमधरीकुर्व-
न्सुधाया वसुधाङ्कतः ।
श्रीगोविन्दमुकुन्दादि-
नाम्नामाम्नानपद्यया ॥ १३

श्रुत्यन्तसंस्तवप्राप्तं
शान्तं रसमनुत्तमम् ।
समभिव्यञ्जयन्दृग्भ्यां
कृपाकूपारतां गतः ॥ १४

Funded by Ministry of MSME

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथापि ! श्रावयिष्यामि
वृत्तं त्वां दुहितुर्मुखात् ।
पितर्युदीरयत्येवं
तत्र सावित्र्यदृश्यत ॥ ३५

सौन्दर्यनिध्यधिष्ठान
देवतान्विति विस्मितम् ।
मुनिं पूर्वं प्रण्यपत-
त्पितरौ च ततस्सती ॥ ३६

फलेग्रहिं गृहीत्वौघं
पारमर्षशुभाशिषाम् ।
पतिं कमवृणोरित्थं
पृष्टाऽऽचष्ट सविस्तरम् ॥ ३७

सावित्र्या व्याहृतिं श्रुत्वा
नातितृप्तमिव स्थितम् ।
उपलक्ष्यर्षिमुर्वीन्द्रः
पत्नीदत्तदृगब्रवीत् ॥ ३८

भद्रङ्कराङ्घ्रिसञ्चार-
पवित्रितजगत्त्रय ! ।
स्फुरस्यपरसूर्यस्त्वं
नैवास्त्यविदितं तव ॥ ३९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घृणापूर्ण। भण स्वैर
मवृणीत यमात्मजा।
स कीदृक्सत्यवान्ब्रह्म-
जिज्ञासा मे बलीयसी॥ ४०

राजन्साल्वपते भ्रष्ट
राष्ट्रस्यान्धस्य चात्मजः।
विदितः पूर्वमेवासौ
यथैषा वक्ति ते सुता॥ ४१

कन्दर्पं ह्रेपयेद्रूपे
विक्रमे शक्रमप्यसौ।
आतुरं षाण्मातुरञ्च
शक्त्यां कुर्यान्नवोऽर्यमा॥ ४२

क्षमायाञ्च क्षमां सोऽयं
धिषणायाञ्च गीष्पतिम्।
वदान्यत्वेऽतिवर्तेत
रन्तिदेवञ्च साङ्कृतिम् ४३

अश्विवद्रूपसम्पन्नो
महोदारो ययातिवत्।
ब्रह्मण्यस्सत्यवादी स
शिबिवत्सोमवत्प्रियः॥ ४४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्ध्याधाराधरोष्णीषं
तुषारगिरिमीश्वरः ।
अनुकर्तुं जटाजूटै-
रच्छस्फटिकविग्रहः ॥ ५

हैममम्बरमाबिभ्र-
त्कटिरञ्जितमौञ्जिकः ।
कृष्णाजिनोत्तरीयेण
स्फुरन्पुरहरोपमः ॥ ६

अङ्गुष्ठतर्जनीभ्यां स्व-
हृन्नैर्मल्यमुदारधीः ।
परीक्ष्य स्फटिकाक्षेभ्यः
स्रग्गतेभ्यो दिशन्निव ॥ ७

हिमाद्रौ दूरतो दृश्यं
स्रोतो गाङ्गं दरानृजु ।
धरन्यज्ञोपवीतं द्रा-
ङ्न्यत्स्मृतिपथं रुचा ॥ ८

भृङ्गभ्रमकृदक्षुद्र-
रुद्राक्षस्रङ्न्मोहरम् ।
अमन्दमकरन्दार्द्रं
सुमदाम गळे दधत् ॥ ९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समुद्गूढशिखण्डैक-
मण्डनप्रसवस्रजा ।
प्रत्येकश्रियमस्तोकं
हरन्निन्दुकलाभृतः ॥ १०

सौन्दर्यदेवतां श्रान्तां
प्रत्यङ्गं तुङ्गनर्तनैः ।
उपवेशयितुं फालं
फलकं कल्पयन्निव ॥ ११

निष्टप्तहाटकश्रीके
ललाटफलकेऽलकैः ।
न्यञ्चितैः कुञ्चितैः कान्ते
ललामोल्लासयन्नलम् ॥ १२

माधुरीमधरीकुर्व-
न्सुधाया वसुधाङ्गतः ।
श्रीगोविन्दमुकुन्दादि-
नाम्नामाम्नानपद्यया ॥ १३

श्रुत्यन्तसंस्तवप्राप्तं
शान्तं रसमनुत्तमम् ।
समभिव्यञ्जयन्दृग्भ्यां
कृपाकूपारतां गतः ॥ १४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथापि ! श्रावयिष्यामि
वृत्तं त्वां दुहितुर्मुखात् ।
पितर्युदीरयत्येवं
तत्र सावित्र्यदृश्यत ॥ ३५

सौन्दर्यनिध्यधिष्ठान
देवतान्विति विस्मितम् ।
मुनिं पूर्वं प्रण्यपत-
त्पितरौ च ततस्सती ॥ ३६

फलेग्राहिं गृहीत्वौघं
पारमर्षशुभाशिषाम् ।
पतिं कमवृणोरित्थं
पृष्टाऽऽचष्ट सविस्तरम् ॥ ३७

सावित्र्या व्याहृतिं श्रुत्वा
नातितृप्तमिव स्थितम् ।
उपलक्ष्यर्षिमुर्वीन्द्रः
पत्नीदत्तदृगब्रवीत् ॥ ३८

भद्रङ्कराङ्घ्रिसञ्चार-
पवित्रितजगत्त्रय ! ।
स्फुरस्यपरसूर्यस्त्वं
नैवास्त्यविदितं तव ॥ ३९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घृणापूर्ण। भण स्वैर
मवृणीत यमात्मजा।
स कीदृक्सत्यवान्ब्रह्म-
जिज्ञासा मे बलीयसी॥ ४०

राजन्साल्वपते भ्रष्ट
राष्ट्रस्यान्धस्य चात्मजः।
विदितः पूर्वमेवासौ
यथैषा वक्ति ते सुता॥ ४१

कन्दर्पं ह्रेपयेद्रूपे
विक्रमे शक्रमप्यसौ।
आतुरं षाण्मातुरञ्च
शक्त्यां कुर्यान्नवोऽर्यमा॥ ४२

क्षमायाञ्च क्षमां सोऽयं
धिषणायाञ्च गीष्पतिम्।
वदान्यत्वेऽतिवर्तेत
रन्तिदेवञ्च साङ्कृतिम् ४३

अश्विवद्रूपसम्पन्नो
महोदारो ययातिवत्।
ब्रह्मण्यस्सत्यवादी स
शिबिस्सोमवदप्रियः॥ ४४

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सत्यं वदत्यस्य पिता
सत्यं माता प्रभाषते ।
तथास्य ब्राह्मणाश्चक्रु
र्नामैतत्सत्यवानिति ॥ ४५

बालस्याश्वाः प्रियाश्चास्य
करोत्यश्वांश्च मृण्मयान् ।
चित्रेऽपि विलिखत्यश्वां
श्चित्राश्व इति चोच्यते ॥ ४६

सत्यप्येवं महान्दोष
एकोऽतिक्रमते गुणान् ।
संवत्सरेण क्षीणायु-
र्मृत्योः प्राप्स्यति वश्यताम् ॥ ४७

दारैरष्टादश समा
स्त्वमभूर्व्रतकर्शितः ।
शतसाहस्रहोमैश्च
सावित्र्यास्समुपासिता ॥ ४८

होमाग्निप्रभवाया हि
देव्यास्तस्याः प्रसादतः ।
तन्नाम्नैवेयमजनि
राजन्सर्वं विमृश्यताम् ॥ ४९

Digitized by Agamnigam Foundation, Chandigarh

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतो वृतं सत्यवन्त
मनया नयवित्तम !।
न रोचयामहेऽन्विष्य
कोऽप्यन्यो ब्रियतां वरः ॥ ५०

चिरकालाभिवृद्धयर्हां
सस्यलक्ष्मीं महोदयाम् ।
प्रातिभासिकभव्याय
भव्यात्मा को विनाशयेत् ॥ ५१

दुरापां योगसम्पत्तिं
गुण्येनाप्यदृढात्मना ।
संयोजयितुमीहेत
को वानुन्मत्तताङ्गतः ॥ ५२

सद्योविवृत्तवक्त्रस्सन्
सावित्रि ! त्यज सम्भ्रमम् ।
परं द्युमत्सेनसूनो
र्वृणीष्वेत्यब्रवीदृषिः ॥ ५३

नारदे शारदेन्दोस्स्व
मुखं विजयि पश्यति ।
अनौचित्यमिव व्यङ्क्तुं
दृष्ट्वाऽऽत्मपितरं सती ॥ ५४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वात्सल्यातिशयादेवं
देवर्षिर्मय्यभाषत ।
हर्षमाविष्करोम्येत
दर्थं प्रणिपतन्त्यहम् ॥ ५५

निराचिकीर्षुरशिवं
मयि प्रेमैकभाजने ।
युक्तं तदपि, सुन्युक्तं
यद्भवानन्वमोदत ॥ ५६

भवन्तो गुरवस्सर्वे
दैवतेभ्यो महत्तमाः ।
अलङ्घ्यं शासनं वेद्मि
युष्माकं परवत्यहम् ॥ ५७

तथापि निश्चियं वच्मि
शृणुत प्रणयान्विताः ।
आर्यपुत्राद्भृतादन्यं
मनसापि न कामये ॥ ५८

सकृदंशो निपतति
सकृत्कन्या प्रदीयते ।
सकृदेव ददामीति
त्रीण्येतानि सतां सकृत् ॥ ५९

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुते मनसा यत्त-
द्वाचा वदति, कर्मणा ।
तत्करोति, ततः श्रेष्ठं
प्रमाणं मन उच्यते ॥ ६०

चिरायुरचिरायुर्वा
गुणवानगुणोऽथवा ।
धनवानधनो वास्या
द्योवृतस्स पतिर्गुरुः ॥ ६१

यदार्यं मे मनस्तस्मिं
श्चित्राश्वेत्युपनामनि ।
अन्वरज्यदतोऽन्यस्य
हृदि स्थानं न विद्यते ॥ ६२

यस्याहं स्वं स मे स्वामी
गुरूणामपि मे गुरुः ।
न कस्याप्यधिकारोऽस्ति
दातुं मामन्यदेहिने ॥ ६३

वरयेतरमित्युक्तिः
साध्व्यां धर्मविरोधिनी ।
सर्वं प्रविदुषां वक्त्रा
नैव निर्गन्तुमर्हति ॥ ६४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नायं दोषो भर्तृकृतः
किन्तु दैवकृतो महान् ।
सोऽपि शक्यप्रतिविधि
स्सुरर्षेरमृषाशिषा ॥ ६५

उद्यन्प्रतीच्यां हरिति
प्राच्यां वास्तमियाद्रविः ।
पतिव्रतायाः पुत्र्या मे
न विपर्येति निश्चयः ॥ ६६

दोषज्ञानेऽपि पाश्चत्ये
न च्यवन्ते विपश्चितः ।
विनिश्चिताच्छुभारम्भा
त्सन्तः प्रतिचिकीर्षया ६७

अकर्तुमन्यथाकर्तुं
कर्तुं वा प्रभवन्मुनिः ।
भव्याय, मदभव्याय
भीतिमेति कुतः पितः ? ॥ ६८

आविर्भूतैकवाग्ज्योति
राशास्ते यन्मुनिर्मयि ।
न भवेद्विप्लुतार्थं तद्यो
वृत्तस्मरुर्मम ॥ ६९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रणनामेत्थमुक्त्वासौ
मुनिं स्वपितरौ ततः ।
अनुत्तरा अपि प्रेम्णा
त्रयो व्यदधताशिषः ॥ ७०

नैषा वारयितुं शक्या
धर्मादस्मात्कथञ्चन ।
नान्यस्मिन्पुरुषे सन्ति
ये सत्यवति वै गुणाः ॥
प्रदानमेव तस्मान्मे
रोचते दुहितुस्तव ॥ ७१

अविघ्नमस्तु सावित्र्याः
प्रदाने दुहितुस्तव ।
साधयिष्याम्यहं ताव-
त्सर्वेषां भद्रमस्तु वः ॥ ७२

एवमुक्त्वा खमुत्पत्य
नारदस्त्रिदिवङ्गतः ।
राजापि दुहितुः सज्जं
वैवाहिकमकारयत् ॥ ७३

इति श्रीसतीचरिते महाकाव्ये मद्रास्थानकवि
श्रीकृष्णमूर्तिकृते षष्ठःसर्गः
॥ ॐ तत्सत् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

सप्तमःसर्गः

अथ पथि सति स्वच्छामिच्छां प्रवर्तयितुं रतः
स्वदुहितृमते दार्ढ्यं धर्म्यं प्रशस्य सुधोक्तिभिः ।
सुरमुनिगिरा जाताश्वास स्सदार उदारधीः
श्रदधित नृपः श्रीसावित्र्या विवाहमहोत्सवे ॥ १

अभिनिविशते सत्सम्बन्धं चिरात्स्म सुदुर्लभं
सपदि पितरं चित्राश्वस्य व्यधत्त समीक्षितुम् ।
धियमिभमुखै र्व्याप्तं सत्वैररण्यमधिश्रितं
विधिविलसिताद्राष्ट्राद्भ्रष्टं नृपोऽश्वपतिः स्वयम् ॥ २

दुहितुरनघं पातिव्रत्यं सुरर्षिसमागमः
स्वसुकृतपरीपाके सम्प्रत्यय स्तइमे त्रयः ।
समजनि तदा हेतु स्साल्वक्षितीशितृदर्शने
न हि सुखकृतेऽजर्यात्सद्भिः परं भुवि सङ्गतात् ॥ ३

श्रवणविषयैस्स्वस्याः पुत्र्या मुखात्कमितुर्गुणै
रनिमिषमहर्ष्यभ्यस्तत्वाद्धृदि प्रतिबिम्बितैः ।
स्वयमनुममौ साल्वाधीशौ नृपस्स च दम्पती
त्वरितमजहाद्याच्ञाभङ्गो भवेन्निति संशयम् ॥ ४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अदयमदिशं क्लेशं पुत्र्या भृशं पतिमार्गणे
बत ! मृदुतनू र्बभ्राम क्ष्मां सपर्वतकाननाम् ।
अलसवदहं दूये किंवाफलं गतचिन्तनै-
रुपरियतनै स्सावित्र्यर्थे लभेय कृतार्थताम् ॥ ५

हृदि जहि भयं प्राणेभ्योऽपि प्रिया ध्रुवमात्मजा
निजमहिमनिस्थित्वा श्रेयस्समस्तमवाप्स्यति ।
विजयि च विधेः पातिव्रत्योज्ज्वलं मतिवैभवं
नृपतिरवदत्पत्न्यामित्थं प्रसन्नमना मुदा ॥ ६

क्षितिपतिघनश्रेष्ठोत्सृष्टैर्वचोमृतवर्षणै-
र्हृदयकुसुमोद्यानं सद्योविकासि यथाभवत् ।
अहह ! न तथा देवर्ष्युक्त्या, यतः प्रियनायका-
ज्जगति किमपि श्रीमालव्या वभा न सतीमणेः ॥ ७

* विवाहोपकरणम्

परिणयकृते भा*ण्डं सर्वं मुदा समपादय-
द्गुरुतरसमारम्भोऽम्भोदो नवःश्रयतामयम् ।
क्षितिशतमख स्साङ्गान्वेदानधीतवतो द्विजा-
न्सपदि सुहृदोऽमात्यान्बन्धून्समान्समनीनयत् ॥ ८

सकलसमयाचार्यां ज्ज्योतिर्विदोऽपिच वैद्यका-
न्स्फुरदुपनिषत्प्रज्ञोन्मेषांस्त्रिवर्गविदग्रिमान् ।
विजयिन इति ख्यातान्विद्वत्सदस्समराङ्गणे
स कवयितृभिर्भूयोऽनैषीत्कलाविदुषोऽन्तिकम् ॥ ९

Digitized by IKS, MDE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सह विटनटै र्वारस्त्रीणां गणा न्सविदूषका--
न्बहुविधवृहद्वाद्याभिज्ञैः श्रुतान्भुवि गायकान् ।
समररसिका न्मल्लान्वेल्ल न्मदेभपरिक्रमा-
न्रथगजपदात्यश्वं विश्वं नृपस्स समानयत् ॥ १०

उपगतवती मेध्यारण्याद्गृहान्क्षितिपात्मजा
स्वरमणमणेरायुर्दैर्घ्यात्परत्र गतस्पृहा ।
प्रथममनघा मातापित्रोःप्रणम्य पदाम्बुजा-
न्यकृत विधिव द्वौर्याः पूजामुषस्यनुवासरम् ॥ ११

कनकनिकरैर्भूभिर्गजैरपि वाजिभि-
र्मृदुळवसनैः क्षौमैर्धान्यैर्गृहैर्मणि भूषणैः ।
स च परिणयप्रस्थानार्थं नृपः परितर्पय-
न्नवनिविबुधान्मिष्टान्यवूभुजदञ्जसा ॥ १२

अपि सुरगुरो र्जैत्रा भूपः परांश्च पुरोहिता-
न्स्वकुलगुरुणा श्रौतस्मार्तप्रयोगविदा सुधीः ।
विमलहृदयानभ्यर्च्योच्चै स्सतैरभिनन्दितः
समुदसहत प्रस्थातुं द्राक्समै स्सुमुहूर्तवित् ॥ १३

क्षितिपतिशतै र्दूताहूतैरुपायनपाणिभि-
र्निजपरिजनैस्सत्कुर्वद्भिर्यथोचितमादृतैः ।
अहमहमिकामाश्रित्य स्त्रीजनैस्समलङ्कृतौ
नृपतिदुहितुस्सन्नह्याद्भिस्सहैमभूयत ॥ १४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अशनवसनै स्ताम्बूलाद्यैस्सुगन्धविलेपनैः
स्रवदुरुमधुस्रग्भिः प्रियङ्गुरदृष्टिभिः ।
अभजत मुदं चातुर्वर्ण्यं सुपूजितमादरा-
त्किमिह बहुना तिर्यञ्चोपि व्यभान्परितर्पिताः ॥ १५

किमुपकरणै र्धर्मारण्यं पुराकुरुते पुरं
सकुतुकमयं मद्राधीशो विवाहमहच्छलात् ।
इति धियमधुः पौराः स्त्रैणैः स्फुरत्तरभूषणैः
पृथुकभणितीः श्रावं श्रावं हसद्भिरनुक्षणम् ॥ १६

इति पुरजनह्लादाम्भोधौ बृहत्यनुगच्छति
स्वयमुदभवत्प्रस्थानं श्रीयुतं क्षितिवज्रिणः ।
सह तनुजया धर्म्यैर्दारै र्बुधै श्च पुरोहितैः
परिजनशतैः सभ्यैरिभ्यै र्गुणाकरमन्त्रिभिः ॥ १७

सुरजनिनदो वीणावेणुक्वणैरुदभून्महा-
नभिनयविधिर्वारस्त्रीणां रणन्मणिकङ्कणम् ।
दिवमदलयद्वादित्राणां रवैर्विजयध्वनिः
क्वचन मुखरीचक्रे काष्ठास्त्रयीं पठतां स्वरः ॥ १८

अपथि चरितुं सेनानाथैर्यथेच्छमशिक्षितं
रथगजपदात्यश्वं रोमाञ्चितं परिपश्यताम् ।
जनयदजहङ्गाम्भीर्यं स्वं भयङ्करविक्रमं
नयनसुभगं रम्यैर्वेषैरदर्शि पुरस्सरम् ॥ १९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पथि सुरभयः प्रादुर्भूताः पुरस्सह वत्सकैः
कतिपयमहाशूद्रयो मूर्धस्फुरद्दधिभाजनैः ।
श्रुतिमुपगतं सूक्तं कौतस्कुतं च यदृच्छया
समजनमनांस्ये धाम्नासुः सुसात्विकवृत्तिभिः ॥ २०

कतिचन दिनान्येष क्ष्माभृत्सुधी रनुयायिभि-
र्वनगिरिनदीस्तीर्त्वा प्राप्तस्तपोधनसङ्कुलम् ।
विपुलमतुलंलक्ष्म्या लास्यस्थलं कुतुकाद्वनं
यदधिवसति श्रीसाल्वेशः सुपुत्रकलत्रवान् ॥ २१

विपिनभवनास्सत्सङ्गेन स्फुरन्त्यपकल्मषा
विदधति जनुस्साफल्यार्थं सदात्मविचारणाम् ।
प्रकृतिसुलभै र्भोग्यैस्तृप्ताः स्वकालमिमे नय-
न्त्यपि वनमृगान्संपश्यन्ति प्रियानिव सोदरान् ॥ २२

नगरमनुजाः क्रूरा व्याघ्रा त्परार्तिकृतस्सदा
कृपणधिषणाः स्वप्नेऽप्यर्थं बताजहतो ध्रुवम् ।
मधुमयगिरा सद्धर्माणां चिरादुपदेशका
द्विचरणमृगा मीमांसन्ते स्वमांसविवृद्धये ॥ २३

स्पृहयतिनमेसौराज्यायाप्यहो ! हृदयं, तथा
सततमघसंवृद्धयै जन्म ध्रुवं नच रोचये ।
कथमिव महामोहाम्भोधिं तरेयमिहार्यम-
न्नय शुभपथं मामित्यन्तः सखैरवदन्नृपः ॥ २४

Funding by IKS(MoE)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुसुमितलताकुञ्जान्गुञ्जद्विजव्रजरञ्जिता-
नसमसुषमा वापीर्वेल्लन्मरालमनोरमाः ।
नरुफलभरैर्नम्रां श्छायाद्रमानवनीश्वरः
शिखरिषु इरीर्दर्शं दर्शं मृशं स विसिष्मिये ॥ २५

अधिगृहमुखं वोह्वा डिम्भानरण्यमृगेक्षणाः
किमुपनतमित्यु त्पश्यन्त्योऽद्भुतं पुरसम्पदः ।
सपदिशनकैः सन्नह्यन्त्यः परस्परभाषणे-
ष्वथ ददृशिरे मद्रेन्द्रेण स्थितिं भजतात्मनि ॥ २६

वनभुवि सतां मा कार्षुः स्वै रुपद्रवमन्वहं
सह परिजनैः सेनानाथा अहंममतोन्नताः ।
इति शुभमति र्दूरा त्स्थानं समर्हमचीकृप-
त्सच कतिपयै र्द्रष्टुं साल्वप्रजेश्वरमञ्जसा ॥ २७

शतमखसमं राजर्ष्यग्र्यं प्रभावसमुच्छ्रितं
विकलनयनं सालस्याधः कुशासनमास्थितम् ।
धरणिविबुधैर्मद्रक्ष्माभृत्स सत्यवतः प्रियं
पितरमभजत्पद्भ्यामेव व्रजन्कचनाश्रमे ॥ २८

सभयमभियन्भक्त्या साल्वेश्वरं समपूजय-
त्सुनियतवचा नाम्नात्मानं न्यवेदयदन्तिके ।
अथ सच दिशन्नर्घ्यं पाद्यं तथासनमर्हते
कुशलमनुयुज्यैच्छद्भ्रातुः समागमकारणम् ॥ २९

Funding by IKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मम दुहितरं सावित्र्याख्यामिमां कमलोपमां
शुभगुणगणैः पूर्णां विद्यास्समा विदुषीं स्वयम् ।
उपगतवतीं गृह्णात्वार्यो भवांस्तनुजन्मने
भवदविदितो धर्मो नास्ति प्रकाशयतात्कुले ॥ ३०

वनमधिगता राज्यभ्रंशादपूर्वतपस्विनो
विविधनियमै र्धर्मत्राणे जनेश्वर ! जागृमः ।
क्षितिपतिसुता क्लेशानेतान्कथन्नु सहिष्यते
ग्लपयति भवान्मल्लीमालां कठोरतरातपे ॥ ३१

क्षणमवचनः श्रुत्वा वाचं स सत्यवतःपितुः
द्विजपरिवृतः प्रोवाचेत्थं मतोऽश्वपतिः सताम् ।
उरुकरुणयाविष्टाः शिष्टाः क्षितीश ! भवादृशाः
स्वसुखविमुखा एवं ब्रूयुर्न कश्चन विस्मयः ॥ ३२

सुखमसुखमप्यभ्येत्यापैत्यतो न विचिन्तये
विषयमिममप्येषा वेत्ति स्नुषा तव मत्सुता ।
तव पुनरिदं प्रत्याख्यानं न युज्यत एव य-
त्समुपगतवान्विश्वस्याहं द्विजैर्भवदन्तिकम् ॥ ३३

प्रणयिनि सुहृद्यङ्ग ! प्राज्ञ ! प्रसीद नमाम्यहं
विमृश मनसा सम्बन्धोऽयं प्रशस्ततरो हि नः ।
क्षितिदिविषदः सम्मन्वीरन्निमे श्रुतिपारगाः
फलतु सहसा सत्सङ्गल्पामरद्रुम एष मे ॥ ३४

Funding by IKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हिमकरमुखज्योत्स्नाहासै र्दृगान्ध्यमपि स्वयं
स्थगयितुमिव प्रादुर्भूतैः सपद्यपकल्मषः ।
स च विशदयन्हर्षोन्मेषं महर्षिसमोऽब्रवी-
त्कतिचन वचांस्योमित्युक्तेःसुधासरितः परम् ॥ ३५

सफलमभवज्जन्मैतन्मे शुभञ्च दिनं यतः
स्वघटत भवत्संबन्धोऽयं चिरादभिकाङ्क्षितः ।
वयमपि समे भावत्कास्स्मो यथेच्छनियोज्यता-
मपि च भवतामर्हत्येष प्रियो मम सत्यवान् ॥ ३६

वनमनुवसन्राज्यभ्रंशाद्व्यथे न मनागपि
प्रियसुतमुखाम्भोजं द्रष्टुं कृतोऽहमभाग्यवान् ।
किमिह करवै शुश्रूषोर्मां सदारमहर्निशं
कुशलमखिलं शक्तः कर्तुं मदभ्यधिको भवान् ॥ ३७

न परमतिथिः पूज्यस्त्वं किन्त्वनल्पतपःफलं
भविकमचिरादेको देवो विधातुमुपस्थितः ।
अयमुपयमो भूयाद्वैधस्तपोधनसन्निधा
वहनि च शुभे भाण्डैस्सर्वैः प्रियार्भकयोश्च नौ ॥ ३८

सपदि नृपती संहृष्यन्तावृषीन्महिषीसखौ
स्वयमुपगमे प्रीतौ प्रत्याश्रमं च कुटुम्बिनः ।
करतलगते पात्रे रौक्मे शुभैः स्फुरदक्षतै-
रमृतभणितैर्भक्त्युन्मेषात्समाह्वयतामुभौ ॥ ३९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रमुककदळीवृक्षैश्चूतच्छदानणुतोरणै-
रलमकृषत स्वर्णस्तम्भोज्ज्वलन्मणिमण्टपम् ।
अपि च निकषा प्रेङ्खत्क्षौमो न्यखानि जयध्वजः
परित उडुसज्योतीरत्नप्रदीपगणा व्यभुः ॥ ४०

वननगरयोस्सम्पत्स्तोमैरकृत्रिमकृत्रिमै
रुपनिपतितैर्लक्ष्मीं काञ्चित्समेधयदात्मना ।
युगपदुभयानानन्दाब्धौ निमज्जयितुञ्जना-
नहनि च शुभे तस्मिन्नुच्चैरदीपि तपोवनम् ॥ ४१

घृतदधिपयोगन्धैर्माल्यैःशुभाक्षतकुङ्कुमैः
सुमकुशसमिल्लाजैः पूगश्छदैः कनकांशुकैः ।
फलससुदयैरम्भःकुम्भैर्हरिद्रितकन्धरै-
र्नवमणिगणैः कीर्णा वेदीरराज हविर्भुजा ॥ ४२

मधुरकबरीभारोद्भ्राम्यद्द्विरेफमनोहरा
कलितसकलाकल्पानल्पत्विषा सुदुकूलिनी ।
स्मरविजयिना चित्राश्वेनासनं गमिताळिभिः
त्वरितमधरीचक्रे सावित्र्यसौ हुतभुक्शिखाम् ॥ ४३

परिणयविधेर्मन्त्रान्व्यक्तस्वराक्षरमुच्चकै-
रमितकुतुकाञ्जेपुर्विप्रास्समेत्य पुरोहितैः ।
धुरि हुतभुजं साक्षीकुर्वन्स संसदि सत्यवा-
न्नृपतिदुहितुः पाण्यम्भोजं करेण मुदाग्रहीत् ॥ ४४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थलकमलकान्याशीर्वाग्भिर्मुदोत्किरतां सतां
मधुरमुदगाद्गीतं श्लाघास्पदं कुलसुभ्रुवाम् ।
परिमलभरो गन्धद्रव्योद्भवः परितोऽन्वभा
व्युदितनिनदैर्वाद्यैर्भेर्योऽप्यघानिषत क्षणम् ॥ ४५

कथमपि पृथग्भावानर्हाविमौ किमुमेश्वरा-
वसमसुषमौ लक्ष्मीनारायणौ जगतः पती ।
शुभतमगिरौ किं वा ब्राह्मीचतुर्वदनाविति
भ्रममुपगता उत्पश्यन्तस्समे वत ! दम्पती ॥ ४६

स्वदुहितृकृते भूरिद्रव्यं दिशन्नवनीश्वरः
दरकलुषितो जामात्रर्थे धृतिं पुनराश्रितः ।
सह निजजनैः प्रस्थातुं द्रागियेष मनीषिणां
धुरि च गणितो लब्धानुज्ञः स माल्वमहीक्षितः ॥ ४७

किमपि हृदये कुर्वत्येषा बहिःपरमुत्सुका
परमविदुषी त्यक्त्वा भूषा दुकूलितवल्कला ।
कमितुरपि च श्वश्र्वास्सावित्र्यसौ श्वशुरस्य च
व्यतनुत मतिं शुश्रूषायामहर्निशमादरात् ॥ ४८

स्वपितु भवती कालेऽश्नातु स्फुरत्विह तृप्तिम
त्यसुकरतरै राज्ञःपुत्र्या अलंनियमस्तव ।
इति गुरुजनैरुद्धाप्यन्ते स्वभाषितकौशला-
दकुरुत सती प्राप्यामुष्मा व्रतानि कृशा भृशम् ॥ ४९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किमु तनुमती प्रत्यक्षं नश्चकास्ति परार्थता
यदविगणयन्त्येषा राजप्रियात्मजतामपि ।
परिचरति न प्राणेशं स्वं तथा श्वशुरौ परं
सुतनुरपि तु प्राप्तान्साधून्समांश्च समर्चति ॥ ५०

अहनि सुमुखी गृह्यैः कृत्यैरुदग्रपरिश्रमा
स्वपति च सुखं पत्यौ रक्षत्यधिक्षपमन्तिके ।
पुरुषमपरं साध्वी सैषा दृशापि न पश्यती
त्यधिकमृषयो दारैर्मेध्यैर्विसिष्मियिरे समे ॥ ५१

शिशिरशिखरिस्रोतःपातेष्वसाववगाह्य च
प्रमुदितमनाः प्रातर्गत्वा समित्कुशसञ्चयैः ।
स्वयमुपहृतैःफुल्लैः पुष्पैः फलैश्च पचेलिमै-
र्निजगुरुजनानानन्दाब्धौ न्यमज्जयदन्वहम् ॥ ५२

हरिणशिशुकानभ्येत्य स्वां प्रियामिव मातरं
स्वतनुमसकृल्लीढ्वोत्प्लुत्य द्रुतं परिधावतः ।
अमितकुतुकादाश्लिष्यन्ती प्रमृज्य च पाणिना
तृणकवलकान्यास्ये न्यास्थद्दयार्द्रहृदां वरा ॥ ५३

दिनकरकरोद्भूतात्तापान्निजोटजमास्थितं
परिचरणतः श्रान्तं धेनुव्रजं सह वत्सकैः ।
सपदि सुखदैस्साम्नाकण्डूयनैस्समुदग्गलं
सुतनुरतनून्दत्वा घासानपीप्यदपोऽमलाः ॥ ५४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमृतमधरीकुर्वत्पक्त्वा चतुर्विधमन्नम-
प्यनुदिनमसौ काले प्राणेश्वरं श्वशुरौ तथा ।
क्षितिसुमनसो भक्त्या प्रीत्याशयत्समुपागता-
न्स्वयमतिमितं सत्यामिष्टावभुङ्क्त रहोगता ॥ ५५

शिखरिशिखराण्यध्यास्य स्वप्रियेण दिनात्यये
मलयमरुदाश्लेषात्तोषं समश्नुवता सती ।
समनुभवता वन्यां शोभां स्वकीयरसोक्तिभिः
प्रतिदिनमगात्कृत्यं सान्ध्यं विधापयितुं गृहान् ॥ ५६

क्वचन समये भर्त्राज्ञप्ता स्मृतिष्वपि बोधिता-
न्दुरधिगमतां प्राप्तान्धर्मानसंशयमब्रवीत् ।
सहृदयतया काव्यान्याख्यत्तथैव विमुक्तये
व्यशदयदसौ ब्रह्मज्ञानं यथोपनिषन्मतम् ॥ ५७

नवरसमुचा शृङ्गाराद्रिस्फुरन्मणिदीपिका
न परमवदद्वाचा कामागमान्पतिदैवता ।
रहसि रमणं सङ्गम्यासावमानुषभोगदा
स्मरमिव रतिस्स्वानन्दाब्धे र्व्यधादपि पारगम् ॥ ५८

चरतनुमिमामाप्रातश्चाक्षपं परिचारिणी-
मवहितमतिं स्वात्मत्राणे क्षमाञ्च वपुष्मतीम् ।
क्षणमपि विना प्राणान्धर्तुं स च स्वयमक्षमः
शतमख इवाभुङ्क्त स्वेच्छं शचीं भुवि सत्यवान् ॥ ५९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वमहिमरतोऽप्यात्मारामः प्रसक्तवदीक्ष्यते
परमकृपया लोकादृष्टोद्भुवा शुभकर्मसु ।
पतिरतिरसौ सावित्र्येवं परेषु पतिव्रता-
ज्जगति न सतीचेतोऽन्यत्र प्रसञ्जनमर्हति ॥ ६०

दुःखं यद्वदुपैत्यतर्कितमपि प्राक्कर्मजन्यं फलं
तद्वन्मां सुखमेत्वलं प्रयतनैरत्रेत्युदास्ते सुधीः ।
ज्ञात्वपीत्थमसौ सुरर्षिवचनादीषत्स्वधैर्याच्च्युता
प्यन्ते नन्दथुमन्वविन्दत पतित्राणं ध्रुवं स्यादिति ॥ ६१

इति श्रीसतीचरिते महाकाव्ये
मद्रास्थानकविश्रीकृष्ण
मूर्तिविरचिते
सप्तमः सर्गः
ॐ तत्सत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

अष्टमः सर्गः

अथ समनुभवद्भ्यां दिव्यभोगानुदार-
प्रकृतिकहृदयाभ्यां गृह्यधर्मैः स्फुरद्भ्याम् ।
गुरुजनपरिचर्यावासवैशद्यधीभ्यां
जितरतिमदनाभ्यां दम्पतिभ्यामभावि ॥ १

मनसि वचसि कर्मण्येकरूपं सुरूपं
सुसहितमतिवृद्धं शास्त्रबुद्ध्या समृद्धम् ।
द्युतिततिजितभानुं सा द्युमत्सेनसूनुं
परिणतमिव भाग्यं भूरि सावित्र्यमंस्त ॥ २

भृशमृजुहृदयेन स्त्रीष्वदृश्येन हृद्यां
सवितृशतसहस्रस्पर्धिदीधित्युदग्राम् ।
अतिशयितरतिं तां कर्णपीयूषभाषा-
मरमयदुरुवीर्यस्सत्यवान्प्राणकान्ताम् ॥ ३

तरळतरविलोकोद्वेल्लितभ्रूलताश्री-
मधुरसरसहासस्निग्धमुग्धाभिलापैः ।
दयितमनुनयन्ती सा स्वतःश्रद्धमुच्चैः
चरितुमनघधर्माञ्ज्ञापयामास नम्रा ॥ ४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सरसि सरसनीरे जाग्रदम्भोजराजि-
प्रसृमरमकरन्दामन्दनिष्यन्दतुन्दे ।
सुललितकलहंसद्वन्द्ववृन्दाभिनन्द्ये
प्रमुदितहृदयौ द्राक्सस्नतुः प्रातरेतौ ॥ ५

द्विजनिजपितृदेवाभ्यर्चने श्रद्दधानौ
भृशमवहितचित्तौ नित्यनैमित्तिकेषु ।
अनुपममहिमानावर्थकामौ च धर्म्यौ
रचयितुमतितृप्तौ निन्यतुर्नैककालम् ॥ ६

धरणिसुरमहर्षी तेजसामेव पुञ्जै-
रजहदुरुसुराजश्रीयुजौ रेजतुस्तौ ।
अपि दिवसकृदुरुः प्रावृषि श्लिष्यमाणौ
तटिदभिनवमेघौ न स्वलक्ष्मीर्जहाति ॥ ७

समुदितपदवाक्याभ्यासदार्ढ्यादुदूढः
स्फुरदुरुगुरुतर्कैर्दुर्गमो ज्ञानभानुः ।
नवरसकविताञ्च स्वप्रभां यद्वदेवं
भुवनभरणमर्हन्सत्यवांस्तामपुष्णात् ॥ ८

तिसृषु रजनिषु स्त्री या विधायोपवासं
प्रतिपदि कुरुते स्वं पारणं साधु, तस्याः ।
पतिरुपगतवान्स्यादायुषो दैर्घ्यमित्थं
विदधदियमशेषं धर्मशास्त्रं स वेत्ति ॥ ९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ शुभदिवसानां जागरूकेऽवसाने
स्वपतिमृतिविधायिन्यह्नि च प्राप्तकल्पे ।
गणितदिनगणा सा पूर्वरात्रीश्च तिस्रः
क्षपयितुमतितीव्रैस्सद्व्रतैर्निश्चिकाय ॥ २०

धृतिमपि जनिसिद्धां राजपुत्र्याश्च साध्व्याः
कमितुरशिवमेष्यत्येव हन्तेति चिन्ता ।
भयमुपजनयन्त्युन्मूलयामासुषीव
त्विषमहिमगभस्तेः प्रावृषेण्याभ्रमाला ॥ २१

स्वतनुमपि जगत्या प्रसरन्ती नतभ्रू-
र्यदुरुतरमसुभ्यः प्रेम पत्यौ न्यधत्त ।
तदसकृदपि जीवत्युल्लिलेखान्यभावं
ननु निजमनुजेऽघं शङ्कते स्नेहवृद्धः ॥ २२

तनुरियमतिमृद्वी हन्त ! वत्से ! शिरीषा-
द्विरम नियमजाताद्राजपुत्रि ! त्वमित्थम् ।
कथमिव कथयेयं प्रत्यवायी ह्यहं स्यां
न किमपि हृदि भातीत्यभ्यधात्साल्वराजः ॥ २३

समयसमुचितैस्सा सान्त्वयित्वा वचोभिः
श्वशुरमशुभशान्त्यायाचचार व्रतं स्वम् ।
अहनि बत ! तुरीये भर्तृहारिण्यहौषी-
द्धुतभुजि सुसमिद्धे साञ्जलिश्चोपतस्थे ॥ २४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिनकृति युगमात्राभ्युद्यते कर्मणा स्वं
व्रतमपि च समाप्योद्भासि पौर्वाह्णिकेन।
शुभजलमवगाह्य श्रीमती सा पवित्रा
द्विजमुनिगुरुवृद्धानानुपूर्व्याद्ववन्दे ॥ १५

सततमविधवा त्वं श्रेयसामेकभूमिः
तुलितहरपुरन्ध्रिः सत्यवत्पत्नि! भूयाः।
इति निगदितमाशीर्वादमन्तस्तथास्त्वि-
त्यसकृदभिदधेऽसौ काष्ठवन्निर्विचेष्टा ॥ १६

व्रतमिदमपि वृत्तं, हन्त! कालातिपातः
श्रमभरकृशगात्रे! पारणां पुत्रि! कुर्याः।
गुरुजन इति वादिन्यस्तमेत्वर्यमायं
क्षुधमपि च निहन्यामित्यदादुत्तरं सा ॥ १७

ददुरपि गुरवोस्यायभ्यनुज्ञां कथञ्चि-
त्सकलमपि विदुष्या मास्तु सङ्कल्पभङ्गः।
इति, तदनु सुरर्षेर्भाषितं चिन्तयन्ती
समयमपि यमस्योपस्थितं त्रस्यति स्म ॥ १८

फलभरहरणाय प्रस्थितोऽरण्यमेको-
प्युरुधृतिरिभमुख्यैर्भीकरं क्रूरसत्वैः।
गगनतलमिवार्कः सत्यवान्स्कन्धदीव्य-
त्परशुरिव हसन्थीपार्वतीयं तदानीम् ॥ १९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
इयमहमनुयास्याम्यार्यपुत्राधुना त्वां
गहनगमनबद्धोद्योगमङ्गयेकदासी ।
कथमपि न विजह्यां वागिव स्वाभिधेयं
त्वदनुमतिमपेक्षे सम्प्रदायानुसारात् ॥ २०

प्रणयपरवशाहं वह्वयोचं क्षमस्वे
त्युदितदरभयाभिव्यञ्जकस्वेदफालाम् ।
निजचिबुकमुदञ्चद्दलतश्चोन्नमय्या
भ्रूभ्यधिकमनुनयन्तीं सत्यवांस्तामवादीत् ॥ २१

दिनमियदपि नाश्नास्त्वं च वृत्तव्रतापि
स्फुरसि भृशतपोभिर्म्लायमानाङ्गवल्ली ।
तव वनगमनं न क्षेमकारं ब्रवीमि
प्रणय इह न विद्याच्छक्तिमल्पीयसीं ते ॥ २२

पथि पथि निजयूथभ्रष्टतामेत्य दुष्टाः
शिखरिण इव दृश्या दन्तिनोऽभ्यापतेयुः ।
असुहररवघोरव्याघ्रकण्ठीरवाणां
क्रमणमनणु मुग्धे ! वीक्ष्यमाणं कथं स्यात् ॥ २३

विपिनभुवि चलेयुर्मन्थरं जङ्गमाद्रि-
स्फुरदजगरराज्यो दन्तुरा दन्तिगर्भाः ।
क्षुधिततरतरक्षूदग्रदंष्ट्राग्रवेल्ल-
न्मृगगलगलदस्रोद्वितरक्तार्द्रितायाम् ॥ २४
Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दयित ! किमुपकुर्यां नाहमेकाकिनस्ते
कुसुमितमृदुवल्लिश्लेषरम्यांश्च वृक्षान् ।
परित उदितहर्षोन्मेषकूजद्विजौघा-
न्वनभुवि किमु नाहं लोचनाभ्यां पिबेयम् ॥ २५

वद किमियमरण्यान्यावयोः काप्यपूर्वा
त्वयि सति मम नैव त्रासलेशावकाशः ।
विपिनमुपवनं स्यात्सञ्चरन्त्यास्त्वया मे
सुहृद इव चरेयुर्द्वीपिमुख्या मृगा नौ ॥ २६

उपवसतिकृता मे नाथ ! न श्रान्तिरस्ति
प्रमुदितहृदयास्मि त्वानुगन्तुं प्रवृत्ता ।
भुवनभरणमर्हन्ब्रूहि भारः किमु स्यां
कथमपि न सहेय त्वद्वियोगं दिनेऽस्मिन् ॥ २७

पतिरथ स पवित्रक्षत्रियायाः प्रियाया
भणितिमननुभूतामित्थमाकर्ण्य हृष्टः ।
न किमपि समदिग्ध स्वच्छहृत्सौहृदग्र्या-
त्सपदि च परिमृज्य व्याजहारात्युदारम् ॥ २८

वरतनु ! परवन्तौ स्वः पितृभ्यामतस्त्वं
द्रुतमनुनयवाक्यैरभ्यनुज्ञां गृहाण ।
अहमपि न भवेयं दोषभागत्र कृत्ये
त्वयि फलतु सताञ्च स्वप्रभोऽनुग्रहात्मा ॥ २९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्वशुरपदसरोजं मूर्ध्नि धृत्वा सुकेशी
विपिनगमनमेषा प्रार्थयामास पत्या।
गृहमुपगतवत्याः पुत्रि! ते हायनोऽभू-
दियदवधि हि कामप्यर्थनां नाकृथास्त्वम् ॥ ३०

[*श्वशुरयोः पदसरोजमितिविग्रहः
प्रकरणाद्वृत्तौद्वित्वावगतिः भवद्विरामिति यथा]

व्रज मम तनुजेन क्षिप्रमागच्छ लक्ष्म्या
भवतु शिवतमो वां वन्यमार्गः समग्रः।
भवतमविरतश्चान्योन्यरक्षैकदीक्षौ
कलयतु कुशलं वां भूरि कालोऽनुकूलः ॥ ३१

हृदयमपि यदासीन्नारदोक्तं स्मरन्त्या
मरुतलमतुलं सन्त्राससन्तापभूम्ना।
समजनि तदनूपं सत्यवत्प्राणपत्न्याः
श्वशुरमुदिरमुक्तैर्दिव्यसूक्तामृतैर्द्राक् ॥ ३२

अथ कठिनकुठारस्कन्धमिन्धानमुच्चै-
र्ग्रथितकचभरं तं नूतनं जामदग्न्यम्।
दयितमनुसरन्ती स्मारयामास सावि-
त्र्यहह! हरकिरातं पार्वतीं सानुयाताम् ॥ ३३

चत! बहिरभिनीतोन्मुग्धमन्दस्मितैषा
मधुरमहृदयाप्यभ्यासतो व्याहरन्ती।
प्रकृतिसुभगताया वर्णने बद्धभावे
स्वयमकुरुत पत्याहूतसंकेतवादम् ॥ ३४

Funding by IKS - MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

खलइव मलिनात्मा वस्तुतत्वापलापे
कृतरतिरसमर्थः स्थातुमग्रे घनोऽयम् ।
दिनमणिमपि देवि ह्यावृणोतीव पश्ये-
त्यभिदधति च पत्यौ सा मुखेऽभूद्विवर्णा ॥ ३५

रविरयमयमानः प्रेङ्खनादद्रि खिन्नः
स्वककनकमयूखैः पश्चिमोर्वीध्रकूटम् ।
नयनसुखमखर्वं वर्धयत्येव भद्रे !
ददति हि बहु सौख्यं स्वावसानेऽपि सन्तः ॥ ३६

सुभगविपिनवापीष्वेष गाढावगाढः
किरति मरुदमन्दं सीकरैः पुष्परेणून् ।
विटपिविटपहस्तैर्नम्रतां प्राप्यमाणै-
रयि ! मधुरफलानि ह्यातिथेयो ददाति ॥ ३७

अभिभवितुमदभ्रैरभ्रमृक्षैरुदग्रं
लसति खलु वनान्तं शैलमल्लिप्रसूनैः ।
मधुरमधुपमाला काममालापशीला
तव मुखकमलं द्रागेष्यति त्यक्तपुष्पा ॥ ३८

निचुलितमनुपश्यद्व्योम मेघैरमोघै-
र्मदवदिदमये ! हृद्रञ्जने जागरूकम् ।
कलयति खलु केकाः केकिनां शाखिमूले
कुलमतुलमुदग्रग्रीवमुद्धतनृत्यम् ॥ ३९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमनस इदमादि प्रेयसोक्तं तु तस्याः
श्रुतिपथमगमन्नो मूकिमानं श्रयन्त्याः ।
किमिदमिति स तिष्ठन्काष्ठवत्सत्यवान-
प्यपशकुनमुदीक्ष्योद्विग्नचेताश्चकम्पे ॥ ४०

उपगतविपिनौ स्वः, प्रस्थितौ नाद्य, तस्मा-
च्छकुनमफलमेतद्भाति मे प्राणनाथ ! ।
त्यज भयमथवा चेद्भावि तन्नान्यथा स्या-
दिति मनसि महीभृत्पुत्र ! धैर्यं लभस्व ॥ ४१

बहिरितिधृतिमुक्त्वाप्यन्तरश्रान्तभीतिः
स्वपतिमजहती साप्यन्वगान्मन्दमन्दम्
क्वचन समुपविष्टः पूरयामास भाण्डं
स्वयमवचितपूर्वैर्द्राक्फलैः सत्यवान्सः ॥ ४२

व्यदळयदथ कृच्छ्रादग्निहात्रेन्धनार्थं
निशितपरशुनासौ शुष्ककाष्ठं द्रढिष्ठम् ।
करगळितमबुध्वाप्यायुधं प्रस्खलंश्च
द्रुतमतिसविधस्थैर्हन्त ! दारैरधारि ॥ ४३

सपदि च परिरभ्य ब्रूष्व किं ब्रूहि किं ते
न किमिति वदसि त्वं, मय्यभूर्नाथ ! नैवम् ।
इति भृशमनुयुज्य ग्लायमानां क्षणेन
न्यगददयमनुच्चैर्मिश्रयन्मीलन्नेत्रे ॥ ४४

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्रमति सुतनु ! नेत्रं, विद्धवत्तीक्ष्णशूलै-
वंजति च मम मूर्धा वेदनां साकमङ्गैः ।
हृदयमपि विशीर्णं चूर्णशः क्वापि याति
स्फुरति दिगपि चैका स्वस्थतापि च्युता मे ॥ ४५

दृषदुरुगुरुवृक्षोद्भेदनादीदृगासं
स्वयमिति निजजायोत्सङ्गविन्यस्तमूर्धा ।
अधिमहि बत ! शिश्ये सत्यवाञ्श्रान्तिभूम्ना
चरमशिखरिशायिव्रध्नसब्रह्मचारी ॥ ४६

क्षणमपि मरणायोपस्थितं नारदोक्तं
कमितुरिति विजानत्यश्वपत्यात्मजाता ।
झटिति परिममार्ज स्वांशुकेनाश्रुपूर्णा
स्फुरति पतिमुखाब्जे स्वेदबिन्दूद्गमं सा ॥ ४७

किमिति बत ! न दीर्यं वज्रघातेऽपि गाढे
मम जगदिति वृत्तं किं ? तमोमज्जितायाः ।
वनविलपितमास्तामित्युपेक्षां नु कृत्वा
न किमपि हि शृणोति प्राणनाथः प्रबुद्धः ॥ ४८

सुविदितमदवस्था ब्राह्मवाचं निरस्य-
न्त्यह ! कथमवृणीथा मामिति क्रोधनस्त्वम् ।
न वदसि रुदतीं वा तर्ह्यभाग्यैकभूमेः
श्रयसि किमिति मेऽङ्कं ब्रूहि चेत्त्वं समर्थः ॥ ४९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथमपि वनमेष्यन्हा ! भवान्न न्यषेधि
स्फटिकहृदय एष ज्ञातवत्या स्वपत्न्या ।
व्रतशतविहितोरुप्रत्ययासं हि तृप्ता
फलमवनिरुहान्न भ्रंशयेन्मन्त्रराशिः ॥ ५०

दिवि भुवि न तदास्ते यच्च मृत्योरदृश्यं
सह भवति स सर्वास्वप्यवस्थासु सर्वैः ।
बक इव झषमेष प्राप्तकालश्च गृह्णा-
त्यत इदमखिलं मे जल्पितं व्याहतार्थम् ॥ ५१

अपरिचितमुखा अप्येणका नौ समीपे
रमण ! मसृणपक्ष्मस्तब्धबाष्पोद्गमास्त्वाम् ।
तृणकबळमुदस्याप्यर्धजग्धं हि पश्य-
न्त्यमृतमपि सुशोच्यं प्रेमपाशेन बद्धाः ॥ ५२

अरुदमिह किमर्थं प्राकृतस्त्रीव मोहा-
च्छ्वसिति पतिरनुच्चैरौष्ण्यमेति क्रमेण ।
स्फुरति लघुशरीरः सम्प्रसन्नोऽस्ति वक्त्रे
ध्रुवमपहतमोहो यावदुत्तिष्ठति द्राक् ॥ ५३

निजजनमुपगम्याप्यर्धजीवं वृथोच्चै-
स्सदसदपि च हन्तोद्घुष्य तद्दोषजातम् ।
व्यथयितुमिव सज्जः क्रन्दनैः स्त्रीनिकायो
वितरति मृतिमाशु स्वार्थसार्थो हि मूर्तः ॥ ५४

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहमपि हि तदन्तःपातिनीत्वादभाषि-
ष्ययमधिशयितोऽङ्कं मूर्च्छितत्वान्न वेत्ति ।
अहह ! धृतिमतीं मां स्नेह एष प्ररूढो
विदधदघविशङ्कां च्यावयामास सद्यः ॥ ५५

जगति जनिमताञ्च त्रासतोऽन्यो न मृत्युः
यदियदवधि साहं नैकवारं मृतासम् ।
रतिमविरतमात्मन्यास्थिता ये तु धीराः
सकृदपि न भजन्ते ते मृतिं स्वादनार्थम् ॥ ५६

अशिवमनिमिषर्षिर्बोधयन्पूर्वमेव
व्यधित मयि कृपालुर्मङ्गळाशीर्गिरं सः ।
सकलमुनिजना अप्येवमन्वग्रहीषुः
शुच इह न पिशाच्या स्यां विधेया वृथाहम् ॥ ५७

विपदियमपि मूर्ध्नो गच्छतूष्णीषसिद्धया
विपुलजगति भर्त्रा स्थास्नुना भाव्यमेव ।
अहमपि सुहरिद्राकुङ्कुमार्हाऽऽमृतेः स्यां
क्षणमपि विधवात्वं न व्रजिष्यामि सत्यम् ॥ ५८

अपि विपदि महत्यां धैर्यलक्ष्म्या जयन्त्याः
सपदि दृगपि वामास्पन्दतामन्दमस्याः ।
पतिमवितुमपापं कोऽपि सङ्गंस्यते द्रा-
गिति मुदितहृदासीत्साधुसङ्गैकलोभात् ॥ ५९

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विकृतिमदिव किञ्चिद्यावदास्यं स्वभर्तुः
दरभयमुदपश्यत्साल्वराजस्नुषेयम् ।
धुरि गिरिवदुदारः पूरुषः कोऽप्यधृष्यः
कथमपि, सुकृतिन्या स्तावदाविर्बभूव ॥ ६०

अरुणवसनमुग्रश्यामदन्तं विवस्व-
त्त्विषमुरुदृढगात्रं रक्तनेत्रं प्रगल्भम् ।
करतलधृतपाशं बद्धमौलिं मृगीदृक्
कमपि कमितुराराद्वेपमाना ददर्श ॥ ६१

भर्तुर्न्यस्य शिरःशनैर्भुवि सपद्युत्थाय बद्धवाञ्जलिं
भीताप्यन्तरवोचतागतवते पुंसे मुदा स्वागतम् ।
कस्त्वं, नूनममानुषोऽसि, भगवन्को हेतुरभ्यागमे,
किं वा कर्तुमिहेच्छसीति च ततः पप्रच्छ साविव्यसौ ॥६२

साध्व्या दाग्विषयो न केवलमहं किन्तूत्तराहोंऽपि च
प्राणान्हर्तुमुपागतः कामितुरित्येषा न वेत्तीव माम् ।
पातिव्रत्यमहानले ज्वलति, किं कुर्यां स्वयञ्चागतो
हन्तेत्याद्यनुचिन्तयन्प्रववृते वक्तुं पुमान्सोऽपि ताम्॥ ६३

इति श्रीसतीचरिते महाकाव्ये
मद्रास्थानकविश्रीकृष्ण
मूर्तिविरचितेऽष्टमः
सर्ग
ओं तत्सत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

नवमःसर्गः

कुशलमस्त्वमृताब्धिसुतोपमे !
स्फुरसि मूर्तिमती तपसां ततिः ।
विजयसे जगतीह पतिव्रता
यदजनिष्यतिथिश्च दृशोस्तव ॥ १

दिविषदप्यहमस्मि च भाषितुं
कृतमतिर्भवतीमपि मानुषीम् ।
विदुषि ! विद्धि यमं समुपस्थितं
प्रियपतेस्तव हर्तुमसुनिमम् ॥ २

गुणवतां धुरि गण्यमहस्कर-
प्रभमुरुप्रतिभं मुनिसन्निभम् ।
सुजनुपं विगतायुषमङ्गगं
तव निबध्य मृगाक्षि ! पुरा नये ॥ ३

इति निगद्य पुरःस्थितमन्तकं
सपदि सत्यवतः प्रियभामिनी ।
अचकिता चकथत्प्रचितारुचा-
नृजुकचेत्थमदृश्चितलोचना ॥ ४

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तव हि दूतगणोऽपघृणो नृणा-
मसुहृतौ प्रहितो भवति प्रभुः ॥
श्रुतमिदं, किमिति स्वयमागमः
पितृपते ! दयया कथयस्व मे ॥ ५

व्यवहृतौ चतुरे ! ननु ते पतिः
शुभमतिः सुतपाः सति ! धार्मिकः ।
पुरुयशास्त्वदुपोद्वलितद्युति-
स्तदहमागतवान्स्वयमन्तिकम् ॥ ६

इति यमः कथयन्प्रथमाङ्गुळि-
द्वयसमाशुतरं व्यथितं भृशम् ।
स निजपाशवशं पुरुषं बला-
द्बत ! चकर्ष तनोश्च सतीपतेः ॥ ७

प्रववृते व्रजितुं स दिशं स्विकां
सपदि सत्यवतोऽभवदप्रभम् ।
चपुरचेष्टमनिष्टमपीक्षितुं
सुतनुरुग्रशुचा व्यमनायत ॥ ८

हृदि धृताश्वपतेर्दुहितोत्थिता
सपदि च क्वचनाशुभदर्शनम् ।
स्वदयितस्य वपुः परिरक्ष्य सा
शमनमन्नगमत्पतिदेवता ॥ ९

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुसुचुरश्रु नवं वनदेवता
स्सह मृगैर्विहगैररमुद्रवैः ।
उरुगिरा किमभूयत भूरुहै
रचलितै र्दिवि च व्यथितैस्सुरैः ॥ १०

न वनमेव परन्तु जगत्समं
समजनिष्ट तदा कलुषं शुचा ॥
अपि पदं स्वमगर्हत सूर्यभू-
र्न हि सतीहृदयव्यथनं वृथा ॥ ११

धनमदान्धदृशं शुभवैदुषी-
मनुगमय्य सुधीरिव सत्यवान् ।
यममिमं गृहिणीं शयितः पुरो-
न्निमषति नेति सुरा अपि बभ्रमुः ॥ १२

प्रतिनिवृत्य यमः "सति ! गच्छता-
दपरकर्म कुरुष्व विशेषतः ।
अनृणतात्मपतावपि दर्शिता
गमनमेतदवध्यधिकं तव ॥ १३
[* गच्छताल्लोणमध्यमपुरुषैकवचनान्तम्]

नियमसद्व्रतसिद्धमहौजसोऽ
प्युपरि तेऽनुगतिं न च रोचये ।
प्रतिहतं च भवेद्व्रतमुत्तरं
व्रज निवृत्य शनैः" इति सोऽब्रवीत् ॥ १४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पतिरयं मम यत्र च नीयते
व्रजति वैष गुरुश्च महान्स्वयम् ।
तदपि मे ध्रुवगम्यमिति ह्ययं
शमन ! धर्म इहास्ति सनातनः ॥ १५

व्रततपोगुरुभक्तिभिरञ्चिता
पतिकृतप्रणयाद्बहुमानिता ।
भवदनुग्रहतश्च पवित्रिता
गतिनिरोधमवैमि न कञ्चन ॥ १६

अपि च सप्तपदक्रमणैर्विदु-
र्भवति सख्यमिति श्रुतिवादिनः ।
तदहमस्मि सखी तव धर्मवि-
द्वर ? गिरं शृणु सादरमद्य मे ॥ १७

अविजिताक्षगणा न च धार्मिका
विपिनभुव्यथवा भवने स्थिताः ।
गुरुकुले वसतिर्न्यसनं तथा
द्वयमिदं जननाय च संविदः ॥ १८

जगति धर्म इहास्ति चतुर्विधः
समफलः श्रुतिविद्भिरुदीरितः ।
अपि चतुष्वेलमन्यतमश्रितं
सुचरितो विपरीतमिति ब्रुवे ॥ १९

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मम मतं, नच धर्मसमुच्चयो
भवति संविदि कारणमित्यतः ।
अकृतदारपरिग्रहमाश्रमं
न्यसनमन्त्यमपीह न रोचये ॥ २०

मखमुखादिसुधर्मविधौ सुधीः
स्वगृहिणीसहितोऽधिकृतः क्षमः ।
सकलमाश्रमधर्ममिहावितुं
चरमसंविदमाप्तुमपि स्वयम् ॥ २१

मम पतिर्गृहिणीसख एव स-
न्निरभिमानतया व्यधिताखिलम् ।
अविकलं गृहधर्ममवस्थित-
स्तपसि सद्गुणसन्निधिरात्मवान् ॥ २२

त्वयि च संहृतवत्यपि धर्मिणं
ध्रुवमहो ! सविशेषणनीतिवित् ? ।
विलयमेष्यति धर्म इति ब्रुवे
विमृश सम्यगिदं दिनकृत्सुत ? ॥ २३

इयदवध्यनघेऽश्रुतपूर्व्यहं
विजयि धर्मरहस्यमुपादिशः ।
अपि च धर्मविदां बत ! राज्यसि
प्रवचनं चतुरश्च चकास्ति ते ॥ २४

[*धर्म रहस्यमित्यस्य श्रवणक्रियां उपदेशोचान्वयः]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विदुषि ! कोऽपि न दोष उदीक्ष्यते
वचसि युक्तिमदर्थसमर्थिते ।
प्रमुदितः प्रददे सकलं वरं
तव वृणीष्व विना पतिजीवितम् ॥ २५

यम ! मम श्वशुरश्च्युतराज्यम-
प्यधिगतः पुनरुत्स्फुरतादसौ ।
अपि च लब्धदृगस्तु वने वस-
ज्ज्वलनभास्कररुक्त्वदनुग्रहात् ॥ २६

तदिदमस्तु तथैव यथावृतं
प्रतिनिवृत्य च गच्छ कृशोदरि ? ।
ग्लपयसि ह्यतनु स्वतनूमिमा-
मनुगमेन शिरीषमृदुमोपमाम् ॥ २७

अविधवास्मि सदा पतिसन्निधौ
मदृत एष न वर्तितुमर्हति ।
न च जहामि कलेव कलाधरं
यम ! मम श्रम इत्यपि ते भ्रमः ॥ २८

प्रभवसि त्वमिमं न मदर्यमा-
त्मज ! वियोजयितुं च कथञ्चन ।
अनुगतिः किमिति प्रतिषिध्यते
सममिदं विदुषा भवता प्रभो ! ॥ २९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जनिसहस्रशतैरपि दुर्लभां
परमसौहृदजन्मभुवं विभो !।
जगति सज्जनसङ्गतिमन्तरा
न खलु सिद्धयति भद्रपरम्परा ॥ ३०

प्रियपतिं मम नेतुमुपागतोऽ
प्यहह ! दृष्टिपथं गमितो भवान् ।
अतिथिरप्यजनिष्ट हि सत्तमः
तदहमस्मि च भाग्यवती भृशम् ॥ ३१

दिविषदापि सता भवता जनि
ध्रुवमजर्यमिदं मम सङ्गतम् ।
भविकमेमि पुराऽऽत्मविदां गुरो
स्तव च नित्यमनुग्रहभाजनम् ॥ ३२

तव च सूक्तिसुधामरनिम्नगा
हृदयभुव्यवतीर्य ममाप्लुता ।
विशदसत्वसुसस्यसमुच्चयं
कलयतेऽविकलं कुटिलालके ! ॥ ३३

अपि वृणुष्व वराङ्गि ! वरान्तरं
नृपसुते ! त्वमृते पतिजीवितात् ।
यदनुकूलमनाकुलमाभणः
सुनिपुणं तदहं परितोषितः ॥ ३४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनरवाप्तसुराज्यसभाजित-
श्चरतु धर्ममिनात्मज ! पूर्ववत् ।
हरिरिवाञ्जदगात्तकुतूहलः
श्वशुर एष च शास्तु निजाः प्रजाः ॥ ३५

इदमदिष्यपि शिष्यसमे ! ऽद्य ते
धृतिजुषे बहु, साध्वनृपसनुषे ! ।
अलमनुक्रमणेन सतीमणे !
त्यज हठात्कृतिमावसथं व्रज ॥ ३६

पथि शुभे चरितुं जगतो भवा-
न्नियमनाद्यम इत्यभिधीयसे ।
स्फुरसि राजति धर्म इह त्वये-
त्यपि च सूर्यतनूद्भव ! धर्मराट् ॥ ३७

मनसि वाचि च कर्मणि तिष्ठता-
मविषमं, यम ! सन्ततमद्रुहाम् ।
सुहृदि वासुहृदीह दयावतां
भवति कामदुघा खलु सङ्गतिः ॥ ३८

भुवि च दानमनुग्रहमामन-
न्त्यधिसनातनधर्ममनुत्तमम् ।
तदुभयं स्फुरति त्वयि सत्तमे
प्रकृतिसिद्धसहो ! समवर्तिनि ॥ ३९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृषितमेष झषध्वजयोषितो
जयिनि ! मां तव वागमृताप्लवः ।
सपदि मोदयते, कमितुश्चृते
सति ! वरान्तरमद्य ददाम्यहम् ॥ ४०

चिरमपुत्रतया परितप्तहृ-
त्क्षितिपतिश्च पिता मम विन्दताम् ।
सुतशतं कुलसन्ततिकर्मणि
प्रभवदुल्लसदौरसमन्तक ! ॥ ४१

सति ! तथास्तु, नृणामपथश्च यत्
तदिदमागतवत्यसि दूरतः ।
द्रुतमितो व्रज पुत्रि ! भयङ्करा-
द्धितमहं निगदाम्युरुसौहृदात् ॥ ४१

असकृदित्थमलं लपितैस्तव
प्रविदुषोऽप्यखिलं रविजन्मनः ।
नियतवल्लभसन्निधिरस्म्यहं
मयि च दूरकथैव सुदूरतः ॥ ४३

अपिच, मुक्तिमतो यम ! जीवतः
किमपि भिन्नतयास्ति हि नात्मनः ।
पतिमृते न च किञ्चन मे तथा
वद सतीत्थमनास्तिकता कुतः ? ॥ ४४

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदि भवांस्त्वरते शृणुताद्रज-
न्ननुसरन्त्यपि सूर्यसुत ! ब्रुवे ।
त्वयि च विश्वसनं महदस्ति मे
प्रणयवान्खलु मय्युरुसौहृदः ॥ ४५

श्रुतिषु यः सुमहान्परिकीर्त्यते
सुकृतदुष्कृतसाक्षितया स्तुतः ।
प्रियसुतो ह्यसि तस्य विवस्वतः
स्ववशताभ्यधिका खलु ते यम ! ४६

अपथगामिषु दण्डधरः स्फुर-
न्नवसि सत्पथभाज इह प्रजाः ।
भवत एवमनुग्रहनिग्रहौ
तव वशे, प्रभुता च महीयते ॥ ४७

प्रियमहं करवाणि किमश्रुतै-
स्सुभणितैः परतन्त्रतया स्थितः ।
वरय तुर्यमपि स्ववरं ददे
कमितृमोकमृते व्रज पुत्रिके ! ॥ ४८

सुतमणे ! द्युमणेर्भवताच्छतं
मयि च सत्यवतस्तनुजन्मनाम् ।
अमितवीर्यबलं कुलवर्धकं
द्युतिमद्रोस्समात्मजदां गुरो ! ॥ ४९

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तव गुरुं गुरुभक्तिमिह स्तुवे
प्रसदनस्य मनः सदनं दधे ।
त्वयि च सत्यवतस्तनुभूशतं
भवतु सर्वगुणं रमणि ! व्रज ॥ ५०

शमन ! शाश्वतधर्मपरायणा
न तनुयाम कदाप्यपथि स्थितिम् ।
जगति दत्तवराश्च भवादृशाः
कथमपि व्यथिता न हि साधवः ॥ ५१

अभिहितानि कथञ्चन निर्वह-
न्त्यपि च भूतदयावशतां गताः ।
न च कुतश्चन बिभ्यति साधवो
विफल एष न साधुसमागमः ॥ ५२

भुविच नाप्यवसीदति सज्जनो
नयति सत्यपथेन दिवाकरम्
स्वतपसैव बिभर्ति महीं, गति-
र्भवति भूतभविष्यदनेहसाम् ॥ ५३

इदमवेत्य च वृत्तमनश्वरं
महितमार्यगणैर्वत ! साधवः ।
प्रतिफलेप्सुतया हि विनेन्धते
भुवि परार्थपराः परिरक्षकाः ॥ ५४

Digitized by S3 Foundation USA

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसदनं न दरिद्रगतं श्रियै
धनवतस्तदमानदमर्थकृत् ।
खलजने तु तदेव च नास्त्यतः
त्रितयवान्प्रभवस्यवितुं जगत् ॥ ५५

लघुपदं विपुलार्थमपांसुले !
विविधधर्मधिये मणिदर्पणम् ।
हृदयहारि वचस्त्वमवोचथाः
तदिह पृच्छ वरं परमोत्तमम् ॥ ५६

समुपदिष्टवतो नचिकेतसे
मम च भक्तिरुदेत्यधिका त्वयि ।
सुमुखि ! मोदमहोदधिमज्जितः
सफलयामि मनोरथमाशु ते ॥ ५७

कलयितुं यदि कामयते भवा-
न्परमनुग्रहमेष च सत्यवान् ।
सपदि भानुतनूद्भव ! जीवता-
दवितथा हि सतस्तव भारती ॥ ५८

पतिमृते न सुखं किमपीह मे
न परमं बत ! लोकमवाप्नुयाम् ।
न च लभे श्रियमद्भुतवैभव !
ध्रुवमहं प्रजहामि च जीवितम् ॥ ५९

Digitized by Kashmir Treasures

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समनुगृह्य सुपुत्रशतं मम
प्रियधवं न च मुञ्चसि यास्यपि ।
कथमहं नु लभेय पतिव्रता
तदपि तेन विना निगदार्कज ! ॥ ६०

सुतनु ! जीवतु ते पतिरेष इ-
त्यवमुमोच स पाशमुदारधीः ।
कमपि हर्षमिदम्प्रथमं श्रितः
प्रणिजगाद गदाधरसप्रभः ॥ ६१

शतमखस्य सखा श्रियि ते पतिः
विहितनैकमखः खजयोन्मुखः ।
शिवकुमारसदृग्भुवि जीवता-
न्नृपसुते ! चतुरब्दशतान्ययम् ॥ ६२

सुतशतं जनयिष्यति सत्यवां
स्त्वयि च वीर्यवतामपरो हरः ।
तव च नामभृतस्तनया अमी
सति ! लसेयुरये ! ऽन्वयशालिनः ॥ ६३

तव पिता जनयेत्तनुजन्मनः
शतमधःकृतमानसजन्मनः ।
प्रसुवि ते नचिरेण सतीमणौ
स्युरपि ते भुवि मालवसंज्ञकाः ॥ ६४

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्युक्त्वान्तरधाद्यमो द्रुतमतः सावित्र्यपि स्वं पतिं
दोषज्ञात्कबितेव साभ्युपगमं लब्ध्वानवद्या स्वतः ।
मर्त्यानामतिदुर्गमात्पितृपथा, द्वैवस्वतानुग्रहा-
त्प्रत्यावृत्य सुखं, वनं तदभजद्यत्र स्थितः सत्यवान् ॥ ६५

इति श्रीसतीचरिते महाकाव्ये
मद्रास्थानकविश्रीकृष्ण
मूर्तिकृतेनवमः
सर्गः
ओं तत्सत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

दशमःसर्गः

भद्रलाभमनुचिन्त्य कृतान्ता-
न्मद्रराजतनुजाथ जगाम ।
क्षुद्रजन्तुचरितापथगा सा
निद्रयेव हतमात्मपतिं द्राक् ॥ १

गाढसुप्तमवितुञ्च समस्तं
जीवलोकमिव भास्करदीप्तिः ।
निस्तरङ्गमिव सागरं सरि-
द्भृतो जनिमती सुजीवना ॥ २

अस्तजीवनतया परिशुष्कं
क्षेत्रखण्डमिव नूत्नघनाळिः ।
मृत्युभीतमिव चात्मसुसंवि-
द्दुर्विदग्धमिव शाश्वतसम्पत् ॥ ३

सा श्लथोद्ग्रथितमाशु धवस्य
न्यस्य शीर्षमनिमेषदृगङ्के ।
म्लानमास्यकमलं परिचुम्ब-
न्त्यम्बरेण निजमश्रु ममार्ज ॥ ४

Funded by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्दमन्दमपलक्ष्म तत्क्षणं
क्षीणमक्षिविषयोऽजनि देहे ।
प्राणलाभमरमेष्यत एकं *
श्रीसमागम इवोत्सुकपुंसः ॥ ५

[* एकं = मुख्यम्]

पाणिपाददरकम्पनपूर्वं
सुप्तबुद्धमिव सापि समुत्थम् ।
वीक्ष्य हर्षमभजत्कुमुदाळी
राहुमुक्तमिव शीतगभस्तिम् ॥ ६

बन्धमुक्तमिव वन्यगजेन्द्रं
द्राक्करेणुरिव हन्त ! करेण !
मृद्नती मृदु ननन्द सुसाध्वी
स्वात्मसंस्थमिव मुक्तिसुलक्ष्मीः ॥ ७

मुग्धचित्तमिव सा स्वकृतान्ते
गुर्वनुग्रहभवा प्रतिभेव ।
कालमाशु कलयन्त्यनुकूलं
वल्लभं स्वलपितैरतर्पयत् ॥ ८

अस्वपस्त्वमतिमात्रमिवात्र
प्राश्वपस्त्वनधिकाः पिव शान्त्यै ।
वीजयामि नळिनीदळहस्ता
नो जयामि भवात श्रमभाजि ॥ ९

Digitized by Siddhanta eGangotri Gyaan Kosha

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उन्निमील निजलोचने शनैः
प्रेमणी इव गृहीतविग्रहे ।
आङ्घ्रिचूडमसकृत्स ददर्श
प्रेयसीं च निजगाद मृदूक्तिम् ॥ १०

स्वापमापमपनोदितुं श्रमं
दीर्घकालमनघे ! हि तवाङ्के ।
न प्रबोधितवतीव किमर्थं
सुप्रभे ! त्वमुपवासकृशापि ॥ ११

श्याममेघसमवर्ष्मसमुग्रः
स्वापमेत्य मम कोऽपि पुमान्यः ।
पाशहस्त इह मामवबन्धुं
प्रायतिष्ठ, स गतःक्व च सुभ्रूः ! ॥ ११

प्राणभर्तरुपसंहृतौ प्रभुः
विष्टपस्य स च नष्ट इदानीम् ।
मा बिभीहि ! यदि शक्यते त्वयो-
त्तिष्ठ पश्य परितो विभावरीम् ॥ १३

पश्यतोऽपि च दृशौ पिदधाना
श्रीरिवापथि समार्जिताशुचिः ।
तत्वविज्ञनिविरोधिनी निशा
व्याप्तिमेति परितो भयप्रदा ॥ १४

Funding by IKS MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थूललोहपरशूद्यमनाद्यै
दारुमेष च यदा व्यदारयम् ।
मूर्ध्नि तीव्रतरवेदनस्तदा
पत्न्यहं समविशं हि तवाङ्के ॥ १५

स स्मराम्यहमियद्व, लवत्या
प्रेमपत्नि ! हृदहारि निद्रया ।
किन्नु वेत्सि पुरुषं वदाद्य मे
स्वप्न एष उत सत्यमृजूक्त्या ॥ १६

कम्पितं बत ! पुनः प्रकम्पया-
न्यद्य नेति दयमानमानसा ।
श्राम्य मा बहुगिरा कृतं प्रिय !
श्वो वदेयमिति सा जगाद तम् ॥ १७

ज्ञानदीप इव सद्विपश्चितां
नाथ ! दुर्गतिसमुग्रवात्यया ।
लोचनोत्सवकरोऽपि वनान्तः
सम्प्रति क्षणदया प्रहण्यते ॥ १८

याव पावनतरौ पितरौ ते
त्वद्वियोगपरिकार्शितचित्तौ ।
द्रष्टुमद्य भवतात्समुत्थितः
प्राणनाथ ! विपिनान्निशि घोरात् ॥ १९

Funding By IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रूरसत्वपिशिताशपिशाचै-
दूषिता निशि भृशं विपिनश्रीः ।
मत्सतीत्वमधुनासहमाना
भर्त्सयत्यधिककौशिकशब्दैः ॥ २०

अर्यमास्तमयमात्रकृतार्थाः
घोरकर्मसु च तामसवृत्त्या
दुष्टसत्वनिवहा अवतीर्णा
दुर्हृदां सदुदयो ह्यसुखाय ॥ २१

शाद्वलेषु बहवः खलु भेका
ऐकमत्यमवलम्ब्य रणन्तः ।
आह्वयन्ति फणिनो ग्रसितुं स्वान्
यान्ति नाशमधियो हि दुरुक्तैः ॥ २२

गीतमात्मरुदितं ह्यभिमत्य
स्वेतरान्त्रसयितुं विरुवन्तः ।
फेरवस्तत इतः प्रचरन्ति
स्वीयकाव्यमिव दुष्कविवर्गाः ॥ २३

शीर्णशुष्कतरुपर्णरवैर्मे
हा ! सरन्ति नु सरीसृपा इति ।
त्रासमेत्यसकृदत्र मानसं
प्रेम भूर्यसुषु हि क्षणिकेषु ॥ २४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एणकप्रमुखयोच्यतिरश्चां
जीवनं हृतवतां दुरात्मनाम् ।
जीवनेन शमयन्ति पिपासां
साध्वसाधुषु समा वनवाप्यः ॥ २५

शैलसन्ततिरिति भ्रममेषा
मन्थरं स्वचलनेन सुदूरे ।
दन्तिपङ्क्तिरपहन्ति निशीथे
नाथ ! वेपथुमती भृशमस्मि ॥ २६

नूत्नवर्त्मसु वनेऽधिकशीत
स्पर्शमात्रकलिताहिबुद्धयः ।
पादसंवलनतो मम भीतिं
ह्येधयन्ति वनवीरुध एताः ॥ २७

गाढसन्तमसलुप्तमतीनां
सत्कृताविव गभीरतरायाम् ।
हन्यते गतिररण्यपद्धतौ
कर्तुमिच्छसि किमद्य वल्लभे ! ॥ २८

दूरतः स्फुरति शुष्कपादपो
मारुतोज्ज्वलितपावको वने ।
स्तोकमग्निमधिगत्य ततोऽहं
वर्धयेयमधिकैरिह काष्ठैः ॥ २९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वावलोकमतिदुर्गममार्गं
देशिकःस वितरिष्यति ध्रुवम् ।
चेच्छ्रमोऽस्ति रजनीमिह नीत्वा
प्राणकान्त ! किमुषस्ययाव वा ॥ ३०

भद्रिरि त्वमवधत्स्व च सावि-
त्र्यत्र वर्तनमहं न रोचये ।
मूर्ध्नि मेऽद्य न रुजोपलक्ष्यते
स्वस्थ एव सति ! सर्वथास्म्यहम् ॥ ३१

स्वत्प्रसादफलमद्य कामये
सङ्गतं शुभमते ! स्वपितृभ्याम् ।
नार्हतः खलु मदेकजीवितौ
मद्वियोगमनघौ कथञ्चन ॥ ३२

नैव भाव्यमभिसन्ध्यमवश्यं
यत्र कुत्रचन पुत्रक ! त्वया ।
इत्ययं गुरुनियोग एव मे
दुःखदो यदुदलङ्घ्यमद्य ॥ ३३

हन्त ! तौ कथमिवाद्य भवेता-
मन्धवृद्धपितरौ वियोजितौ ।
दुःखमीषदपि वृद्धजनानां
हानये, किमुत तस्य तीव्रता ॥ ३४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सद्मनो बहिरहन्यपि चेत्स्यां
दुःखितौ तत इतो मृगयन्तौ ।
साकमाश्रमजनै र्भवतस्तौ
किं करोमि ! विधिना प्रहतौ स्वः ॥ ३५

पञ्चषानपि सुकेशि ! निमेषा-
न्मद्वियोगमहहासहमानौ ।
दीर्घकालमिममाकुलधीकौ
जीवितञ्च नतरां धरिष्यतः ॥ ३६

उन्नतिं गमय वंशमावयोः
सन्ततिं कुरु निरन्तरं सतीम् ।
पिण्डदो भव यथाविधि तृप्त्यै
स्थापयाध्यवनि कीर्तिपताकाम् ॥ ३७

वार्धकेन परितप्यमानयो-
र्जीवतोस्त्वमवलम्बनयष्टिः ।
त्वामृते क्षणमपीह जीवितं
नो भजेव सुत ! सन्निहितः स्याः ॥ ३८

इत्थमन्वहमिहादिशतोर्मो
द्रोहमस्मि कृतवान्सह पत्न्या
नास्ति कोऽपि पितृवाक्यपालना-
द्भद्रकुक्षुति सनातनधर्मः ॥ ३९

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीवतोस्सति ! ममानुजीवनं
श्रद्धया भरणमन्वहं, तथा ।
तत्प्रियैककरणं प्रयत्नतो
ज्ञायतामिति महद्व्रतत्रयम् ॥ ४०

धिक्सुषुप्तिमुरुमोहकारिणीं
धिग्विधिं बहुविपद्विधायिनम् ।
शून्यमेतदजनिष्ट जगन्मे
प्राङ्मियेय च तयोर्मरिष्यतोः ॥ ४१

इत्थमेष गुरुभक्तिमदभ्रयः
सत्यवान्प्रणयतो गुरुप्रियः ।
धार्मिको बहु रुरोद सुस्वरं
द्राग्वतोर्ध्वकरमर्भकतुल्यः ॥ ४२

सा प्रमृज्य सहधर्मचारिणी
भर्तुरश्रु बहु पाणितलेन ।
दुःखदीर्णहृदया प्रतिश्रवं
सान्निधौ सपदि कर्तुमुद्यता ॥ ४३

स्यामहं यदि भृशं तपस्विनी
सुव्रता च महती पतिव्रता ।
सत्यवत्यपि च वाचि सन्ततं
जीवतां सुखमिह श्वशुरौ मे ॥ ४४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न स्मरामि यदि चेतसाप्यहं
प्राणभर्तुरितरं नरं सदा ।
शर्वरीयमपि शर्मदायिनी
स्तान्मम श्वशुरयो स्तथैव नौ ॥ ४५

कामयेऽहमचिरात्पितरौ मे
द्रष्टुमिष्टतमपत्यसीह चेत् ।
प्रस्थिता भव सहे न विलम्बं
किन्नु दृष्टिविषयौ च भवेताम् ॥ ४६

वेत्सि धर्ममिहचे, यदि वा मां
जीववन्तमुपलब्धुमीहसे ।
कर्तुमिच्छसि मम प्रियं यदि
प्रस्थिता भव सतीत्यवदत्सः ॥ ४७

सन्नियम्य कुटिलानलकान्स्वा-
न्बाहुमूलकृतदोर्लतिका सा ।
आत्मना सपदि चोदतिष्ठिप-
च्छ्रेष्ठमर्घरहितैर्गुणैः प्रियम् ॥ ४८

सत्यवांश्च परिमृज्य करेण
प्रेमवामदृशमादरभारात् ।
प्रेक्षते स्म परितस्स जिघृक्ष-
न्स्वं कुठारमथ भरिकठोरम् ॥ ४९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्वो हरिष्यसि फलान्यमलात्म
ञ्श्राम्य मा परशुमाहराम्यहम् ।
इत्यसौ बत ! विकृष्य च वृक्ष-
स्कन्धतः स्म नयति स्वयमूह्य ॥ ५०

वामहस्तमधिकामुकवाम-
स्कन्धमिन्दुवदना विनिवेश्य ।
दक्षिणस्वमृदुदोर्लतया तं
प्रस्थितिं स्म तनुते परिरभ्य ॥ ५१

लक्ष्यतेऽप्यसकृदभ्यसनाच्च
ज्योत्स्नयान्तरितया तरुवर्यैः ।
मार्ग एष गजगामिनि ! मेऽद्य
त्वर्यतां श्वशुरदर्शनसिद्ध्यै ॥ ५२

आगतौ स्व इह भूपतनूजे !
यत्र पथ्यवचितानि फलानि ।
तद्व्रजाव च यथागतमावां
मा विचारय मनागपि कान्ते ! ॥ ५३

भाति भामति ! पुरो हि पलाशः
तत्र वर्त्म च विभिद्यते द्विधा ।
मा भजस्व गमने च विमोहं
योत्तरा व्रज तयैव पद्यया ॥ ५४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वास्थ्यमेमि बलवत्तरमद्य
स्तोकमप्युपलभे न च क्लमम् ।
कौमुदीयमपि दृष्टिगोचरः
शीघ्रमाव्रज निजोटजं प्रिये ! ॥ ५५

वेद्मयहं, त्वमबलास्युपवास-
क्लेशिताप्यरमितीह कृशाङ्गि ! ।
सत्यपीत्थमहह ! त्वरयामि
क्षाम्य मां स्वपितृदर्शनकामम् ॥ ५६

लोके स्वार्थाधिगमविधये प्रत्ययः स्वप्रकृत्या
संयुज्यैव प्रभवति यथा, सत्यवान्लोऽपि तद्वत् ।
साध्व्या मद्रेश्वरतनुजया स्फोरितात्मप्रकाशः
प्राप्तुं पित्रोर्निकटमटवीपद्धतिं टीकमानः ॥ ५७

इति श्रीसतीचरिते महाकाव्ये मद्रा
स्थानकविश्रीकृष्णमूर्तिविरचिते
दशमः सर्गः
ओं
तत्सत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

श्रीसतीचरितमहाकाव्ये

एकादशःसर्गः

अधिगतनयनः प्रसन्नदृष्टि-
स्समुदलसत्समयेऽत्र साल्वराजः ।
वनतलमखिलं ददर्श सभ्य-
क्समधिकविस्मयमानमानसोऽसौ ॥ १

स च वनभुवि सत्यवान्स्वपत्न्या
निजमुटजं व्रजति स्म यत्र रात्र्याम् ।
सुतविरहसुदुःखितौ तदैव
प्रियपितरौ च विचेतुमारभेताम् ॥ २

अपि शुभदृगसौ ननन्द नैव
स्वसुतमुखाब्जविलोकनेन हीनः ।
गुणगणमणिभूषणैः स्वदारै-
स्सपदि ममज्ज च दुःखवारिराशौ ॥ ३

अनुभवितुमहं चिराय लब्धं
सुतमपि सद्गुणशेवधिं न पुण्यम्
अकरवमि,ह किं दृशोः फलं मे
समजनि मेऽद्य जगत्त्रयं परीतम् ॥ ४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षणमपि बत ! जीवितुं न शक्तः
सुतमुखलोकनमन्तरेण वृद्धः ।
कथितहृदधिकं क यामि शैब्ये !
मम यम एव भवेदिवातिथेयः ॥ ५

किमियमुपगता नु कालरात्रि-
र्मदसुविनाशकृते, च धर्मभार्ये ? ।
समवगतसुतस्नुषासुवार्तौ
यदि मृतिमेमि भवेन्मनःप्रशान्तिः ॥ ६

कच कथमनघे ! ऽद्य दम्पती स्तो
विषमतमे वनसीमनि क्षपायाम् ।
मृगपतिमुखदुर्मृगैकराज्ये
भयकृति दुग्धमुखौ हहा ! हतोऽस्मि ॥ ७

अपथि पथि च संस्खलद्गती तौ
बहुकुशकण्टकविद्धगोणिताङ्घ्री ।
रुरुदतुरधिकं न केवलं, किं
त्वसकृदरोदयतां च भूतजातम् ॥ ८

अणु रणनमपि श्रुतं यदि स्या-
न्निशि विपिने च यतः कुताश्चिदेतौ ।
प्रियसुत ! भवसि क पुत्रि ! साव-
ऽयभिलष्य सामिति धावतः स्म वृद्धौ ॥ ९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विपिनगिरिसरित्सरःस्वनेके-
ष्वयतत दारसखो विचेतुमेषः ।
उपगत इव चित्तविभ्रमं द्रा-
क्षितिपतिराश्रमवासिभिर्न्यषेधि ॥ १०

शब्दब्रह्मज्योतिषि ध्यानयोगा-
दृष्टादृष्टे स्वैरमध्यक्षयन्तः ।
रुध्वा वृद्धौ दम्पती भूमिदेवा
निन्युः कृच्छ्रादाश्रमं सान्त्वयन्तः ॥ ११

प्रोचुश्चित्राः पूर्वराजाश्रयास्तेऽ-
प्याश्वासार्थं सत्कथाः श्रोत्ररम्याः ।
गुर्वीमार्तिं दम्पतिभ्यां दधद्भया-
मुर्वीदेवाः प्रेमसम्पत्समृद्धाः ॥ १२

सत्यप्येवं भेजतुः स्वस्थतां न
स्मारं स्मारं बाल्यलीलाः स्वसूनोः ।
सावित्र्या अप्यर्धहीनान्गुणौघा-
न्हाहा ! पुत्रेत्येत्येव चक्रन्दतुस्तौ ॥ १३

तेषां मध्ये सूर्यवर्चास्सुवर्चाः
"सावित्र्येषा स्वैस्तपोभिर्दमेन ।
भात्याचारैर्यत्सुराजन्नतस्ते
पुत्रो जीवन्नात इत्याजभाण ॥ १४

Digitized by SRKS-MOE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रोवाचेत्थं सत्तमो गौतमो''ऽसौ
''साङ्गान्वेदान्वेद्मि राजंस्तपस्वी ।
सत्कौमारब्रह्मचर्यो गुरूणा-
मग्नेर्भूयस्तोषकः सद्व्रतोऽहम् ॥ १५

वीताहारो वायुभक्षो यथाव-
द्वर्तेऽजस्रं भो द्युमत्सेन !, सर्वम् ।
वेत्तुं शक्तो दिव्यदृष्ट्याहमस्मि
प्राणान्धत्ते सत्यवांस्तेऽद्य पुत्रः ॥ १६

शिष्योऽवादीद्गौतमस्याथ कश्चि-
त्तत्तत्सर्वं स्यादुपाध्याय एषः ।
यद्यद्ब्रूते, भूपते ! मा बिभीहि
स्वस्थः पुत्रो जीवतीत्येव मन्ये ॥ १७

वैधव्यस्याधायकं लक्ष्म चैकं
नैवाद्राक्ष्म क्ष्मापते ! ते स्नुषायाम् ।
तस्माद्ब्रूमः सत्यवाञ्जीवतीति
श्रेष्ठाः प्रोचुर्ब्राह्मणाः संयमीन्द्राः ॥ १

भारद्वाजोऽप्यन्ववादीत्सुवर्चः-
प्रोक्तं, दाल्भ्यो लब्धवाल्भ्य ऊचे ।
दग्लाभस्ते यद्ध*दाहारहीना
सावित्र्ये,वं प्राणिति प्रेमपुत्रः ॥ १९

[*यद्वदित्यस्य पूर्वोत्तरयोः संबन्धः]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राज्ञो वृद्धिं शान्तदिक्ष्वाह तिर्य -
कपक्षिव्रातस्तत्, सुतो जीवतीति।
आपस्तम्बः स्माह धौम्योऽथ चिह्नै-
र्दीर्घायुष्मान्स्वैर्गुणैश्चेति बाढम् ॥ २०

सपदि प्रविशन्स सत्यवा-
न्सह पत्न्या रजनौ निजोटजम्।
जनकौ द्विजनुर्निषेवितौ
प्रणनाम प्रणयैकभूषणः ॥ २१

पततो गिरिशृङ्गतो जवा-
दवलम्बश्च यदृच्छयेव सः।
स्वपितुः प्रददौ सुविस्मय-
व्यतिषक्तं बत ! हर्षमागतः ॥ २२

समुदग्रशुगश्रुनिर्झरः
दृशि हर्षोद्भवबाष्पसन्ततिम्।
अभिगम्य विमिश्रमात्मजं
कमपि प्रादुरबीभवद्रसम् ॥ २३

समभून्नृपतेश्च शैब्यया
बत ! जन्माभिनवं नवोदयम्।
तनुजं विरुजं स्वमादरा-
त्परिरभ्याभि जातविस्मृतेः ॥ २४

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जलदं तटिदुज्ज्वलं शिखी
परिपश्यन्निव सत्यवत्पिता ।
तनयं स्नुषया विभूषितं
समनृत्यत्स युवेव तत्क्षणम् ॥ २५

सुचिरानुभवात्तवासनां
शुचमेषा मुदलं न गूहितुम् ।
जनकौ यदवोचतां सुत !
क वतासी,त्यपि दृश्यतां गते ॥ २६

स्थगितं चिरमश्रु पक्ष्मणो-
रहरन्नेत्रफलं न केवलम् ।
अपि तु न्यरुणत्समेष्यतोऽ
प्युदबिन्दून्स्वनिपातशङ्कया ॥ २७

सदनाद्गतवान्दिनात्यया-
दपि पूर्वं ह्यनया नवोढया ।
विपिनं किमिति व्यलम्बयः
कथयेत्येवमचूचुदन्द्विजाः ॥ २८

विदितोऽसि हि धर्मविद्वरः
पितरौ हन्त ! किमित्यखेदयः ।
अथवा समयः प्रदुष्यति
प्रबलो धीनलिनीहिमद्युतिः ॥ २९

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषदप्यवसानशोभना
न च दोषाय गुणाय केवलम् ।
विविधाः खलु बुद्धिशक्तयो
दृषदीवात्र जयन्ति तेजिताः ॥ ३०

इत्थमुदीर्य गिरं समुदारा-
मादरभूरिमनोहरमेनम् ।
राजकुमारममारक,मूचु
र्भूमिसुरा अथ भूमिमहेन्द्रम् ॥ ३१

नेत्रमभूत्तव नेत्रमदिष्णोः
सूनुरसूनुरगेशसमागात् ।
भूरि हिता दुहिताश्चपतेस्ते
भाग्यमिदं त्रयमत्र यतात्मन् ॥ ३२

[नेतृ+अमदिष्णोरितिच्छेदः । उरगेशसम ! आगादिति च्छेदः । साम्यं भुवो भरणे, वाग्वैशारद्ये वा]

दानतपोव्रतयज्ञविधाना-
त्सीमविहीनमहिम्नि विभासि ।
अभ्युदयोऽभ्यधिको भवतात्ते
भद्रकृतो न भजेयुरभद्रम् ॥ ३३

राज्यमिदं तव कृत्स्नमरण्यं
संयमिनो वयमाप्तजनाः स्मः ।
पाहि सुतानिव नस्त्वमजस्रं
सूनुरयं भवताद्युवराजः ॥ ३४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टदिगीशविशिष्टगुणांशै-
दुष्टयमोपम ! शिष्टसुहृत्त्वम् ।
संस्फुरसि ह्यपरो भुवि भानु-
स्त्राणकृदत्र निरन्तरमास्स्व ॥ ३५

सन्निहिते त्वयि राजमहर्षौ
हर्षमुपेत्य सनातनधर्मः ।
कल्पतरुर्वितरेत्पुरुषार्था-
नल्पमिवार्द्रय नः शुभदृष्ट्या ॥ ३६

राज्यमपि च्युतमच्युतकीर्ते !
पूज्यतमैः परिपालितपूर्वम् ।
हस्तमुपैति पुरेत्यभिदध्मो
ध्वस्तरिपोरचिरात्तव तृप्त्यै ॥ ३७

सुस्नुषया विषयाश्च शुभास्त्वां
यन्नमृते गमिता गृहलक्ष्म्या ।
सान्वय एव हि शर्मसमूहो
धर्ममिहाव सुवर्मसमानम् ॥ ३८

राष्ट्रगतोऽप्यटवीमिव धाम्ना
पालय राष्ट्रमरण्यगतस्त्वम् ।
शान्ततमा हि तपोवनभूमि-
र्दान्तहृदेष तपस्विसमाजः ॥ ३९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साधुसमागम एव सुराज-
जन्मफलं बलमात्मविदाञ्च ।
जातु च नार्हसि हातुमिमान्स्वा-
न्यद्वदितव्यमगादि तदद्य ॥ ४०

इत्येवं शुभमतयस्त°मुक्तवन्तः
प्रज्वाल्य ज्वलनमधिक्षपं द्विजाते ।
पप्रच्छुः स्थितमथ सत्यवन्तमारा
त्सावित्रीमपि भुवि शैब्ययोपविष्टाम् ॥ ४१

[° तं+साल्वराजम्]

प्रस्थानादियदवधि प्रवृत्तमद्य
व्याख्याहि श्रवणकुतूहलं महन्नः ।
सावित्र्या क्षितिपसुतं दृशेह किं स्वि-
त्पश्येमे, त्युरुतरदुःखमन्वभूम ॥ ४२

ह्यः पित्रोरनुमतिमेत्य काननाय
प्रस्थानं ह्यकृषि निजाश्रमात्सदारः ।
आहार्षं पथि च फलानि, काष्ठहेतो-
रच्छैत्सं धृतपरशुस्तरुं सुशुष्कम् ॥ ४३

मूर्ध्नि द्राग्गुरुतरवेदनोदभून्मे ।
त्रासं मे जनयति याधुना स्मृतापि ।
विस्रंस्य व्यथयितुमङ्गसन्धिबन्धं
नैतादृग्यदहह पटुर्मयाऽनुभावि ॥ ४४

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मूर्छोऽहं भ्रमणमनण्वभूतपूर्वं
सद्यो यन्दृढमिव सम्प्रहारमाप्त्वा ।
अस्वाप्सं सुचिरमिवाथ, मास्तु तापः
सर्वेषां व इति समागतो निशीथे ॥ ४६

उक्त्वैवं व्यरमदसौ च सत्यवान्द्रा-
क्पर्याप्तं न तदिति गौतमो महर्षिः ।
सावित्रीं परिषदि भाषयन्द्विजाना-
मप्राक्षीत्क्षितिविनिविष्टदृष्टिपाताम् ॥ ४६

सावित्री स्फुरसि महौजसा च सावि-
त्र्यज्ञातं न च तव किञ्चिदस्ति लोके ।
माहात्म्यं तव च परावरज्ञतायाः
जानीमो वयमपि मद्रराजपुत्रि ! ॥ ४७

नाकस्मात्किमपि भवत्यपि त्ववश्यं
भाव्यं तन्व्यनवगतेन कारणेन ।
चक्षुष्माञ्श्वशुर इवाभवत्कथं ते
वेत्सि त्वं निगद न चेन्निगूह्यमद्य ॥ ४८

प्रत्यग्दृक्प्रभवति यद्यपि द्विजौघो
विज्ञातुं निखिलमनाविले ! तथापि ।
प्रत्यक्षं विपिनतलेऽनुभूतवत्या
वक्त्राज्जात्तव वचनं विशिष्यते नः ॥ ४९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

औन्नत्यं किमपि निदर्शयन्तमेषा
भव्यं स्वं विनयमधोमुखी दधाना ।
आदातुंन्निव निजभर्तुरभ्यनुज्ञा
मुद्वीक्ष्य क्षितिदिविषद्गणं बभाण ॥ ५०

तदा स्वपन्तं निकषा पतिं गता
सदा विधेया भवतां महात्मनाम् ।
सपद्यपश्यं समुपस्थितं स्वयं
विपद्यतः प्राणभृतां तमन्तकम् ॥ ५१

निपानतो जीवनमुष्णदीधितिः
स्वपादतत्येव विवस्वतः सुतः ।
विपाप्मनोऽसून्वपुषो मदीशितुः
स पाशरज्ज्वा विचकर्ष निष्कृपम् ॥ ५२

समन्वगां तत्क्षणभूरिसम्भ्रमा
तमन्तकं दक्षिणमार्गगामिनम् ।
नमन्त्यहं भीतिमुपेत्य भूयसीं
सुमञ्च नुत्यात्मकमाश्ववाकिरम् ॥ ५३

नितान्ततृप्तः स्तुतिभिः प्रसादितः
सुतामिव स्वां परिगृह्य सादरम् ।
कृतान्त एतद्वरपञ्चकं ददौ
सतामुपास्तिर्हि यथार्थकामधुक् ॥ ५४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स विन्दतां मे श्वशुरः पुनर्दृशौ
रविञ्जयन्नोजसि राज्यमप्ययम् ।
सुताः शतं सन्तु ममापि सोदरा
*जितात्मवानेतु पतिश्च जीवितम् ॥ ५५

[* नकर्मधारयान्मत्वर्थीय इति प्रायिकमसुब्वत इति भाष्यप्रयोगात्]

इतिह्यहं प्रार्थितवत्यसुं यमं
मतिस्तदा मेऽप्युदपद्यतेदृशी ।
अनुग्रहश्चेन्मयि नो भवादृशां
न च प्रसीदेद्यमुनासहोदरः ॥ ५६

अनादिधर्माध्वनि वर्तयन्प्रजाः
स धर्मराजोऽष्टहरित्पतिप्रभुः ।
असज्जनान्दण्डधरश्च शिक्षय-
न्महीयतामन्वहमर्यमात्मजः ॥ ५७

असद्ग्रहं प्राप्तवतामिहान्तकः
सदात्मनां ज्ञानगुरुर्बृहत्तरः ।
श्रुतीरितप्राभव एष पूषजः
प्रपद्यतामभ्युदयाय भूयसे ॥ ५८

अनाद्यविद्यातिमिरैकभास्करः
सकृत्प्रपत्त्यैव समीहितप्रदः ।
परत्वसौलभ्यनिधिः स्वधामभिः
प्रकाशतां पूरि स कामसिद्धिभूः ॥ ५९

Funding by IKS(MoE)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परेतराजश्च कृपासरित्पतेः
प्रतिप्रभातं स्मरणं समर्हतः ।
प्रधाननेतुः कठनाटके सतः
समस्तसन्मङ्गलमस्त्वनुग्रहात् ॥ ६०

चिरात्सत्सन्तत्या विरहितमतस्तप्तहृदयं
सती सावित्रि ! त्वं वृहति बत ! गर्ते निपतितम् ।
अनिन्द्यश्रीर्वृन्दारकसमभिनन्द्यैर्महिमभिः
समुच्छ्रायं प्राप्यान्वयमुभयमाशुह्युदधरः ॥ ६१

जगत्त्रितयमुत्तमै स्स्वचरितैस्समभ्यर्चिता
पवित्रयितुमीशिषे दिविषदापगेव स्वयम् ।
सतीकुलशिखामणे ! शिखरितुङ्गशृङ्गोपरि-
स्फुरन्मणिसुदीपिका भुवि सदा हि देदीप्यसे ॥ ६२

विशदयशसा स्फीताऽऽदर्शो महान्कुलसुभ्रुवां
विजयस इह प्राप्याप्युच्चैरनुग्रहमर्कजात् ।
अपिच गुरुता काप्युत्पन्ना त्वया भरतक्षितेः
तव चरितमप्याचन्द्रार्कं सति प्रतितिष्ठतु ॥ ६३

स्तुत्वैवं तेऽश्वपतितनयामाशिषां मानयन्तः
स्तोमैराप्त्वानुमतिमचिराच्छ्रीद्युमत्सेनभूपात् ।
जग्मुःस्वं स्वं सदनमवनिद्योसदो रात्रिशेषं
नेतुं, सावित्र्यपि तु मुजजगार वृत्तं स्मरन्ती ॥ ६४

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रातर्निर्वृत्तकृत्यास्त
उपासाञ्चक्रिरे नृपम् ।
प्रीणयन्तो मुनिगणाः
सतीचरितवर्णनैः ॥ ६५

तदा साल्वप्रकृतयः
सुकृतिन्यो मुदान्विताः ।
अकस्मादिव तं प्राप्ताः
सागरं सरितो यथा ॥ ६६

स्वीकुरुष्व निजं राज्यं
पारम्पर्यादुपागतम् ।
रिपुरस्मदमात्येन
सबलो विलयं गतः ॥ ६७

जनानुरक्षणं राज-
न्कुर्याः स्वर्यापितासुहृत् ! ।
त्वरस्व प्रार्थयामस्त्वां
पुरन्दरमिवामराः ॥ ६८

मुनिभिस्सोऽभ्यनुज्ञातः
शैब्यया शिबिकां गतः ।
सावित्रीसत्यवद्भ्याञ्च
जनैस्साल्वानगान्नृपः ॥ ६९

Funding by KS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लक्ष्म्येव पङ्कजाक्षं तं
द्युमत्सेनं च शैब्यया ।
जनाः सिंहासनासीन-
मभ्यषिञ्चन्प्रहर्षिताः ॥ ७०

सावित्र्या सत्यवन्तञ्च
शच्येव नमुचिद्विषम् ।
युवराजपदे हर्षा-
त्सद्योऽभिषिषिचुर्जनाः ॥ ७१

सुभ्रातृशतशालिन्यां
पत्न्यामाप्त्वा शतं सुतान् ।
शास्ति स्म सत्यवान्राज्यं
चतुर्वर्षशतान्ययम् ॥ ७२

संस्कृतज्ञानसम्पत्त्या
धर्माज्ञात्वपिचाजहत् ।
चिरंजीवत्तदानन्दं
चातुर्वर्ण्यमविन्दत ॥ ७३

ॐ

तत्सत्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुधीः पण्डितराजः श्री-
मद्रास्थानकवीश्वरः ।
निरमात्कृष्णमूर्तिः श्री-
सतीचरितमुत्तमम् ॥

इति श्रीमद्रमण्डलसंस्कृतास्थानकवि
श्रीकृष्णमूर्तिशास्त्रिकृतिषु
श्री सतीचरिते महाकाव्ये
एकादशः सर्गः
समाप्तश्चा
यं ग्रन्थः
ओं

Funding by IKS-MoE

SRI RAMAKRISHNA PRESS, MADURAI-52.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ERRATA.

पृष्ठ	श्लोक	अशुद्ध	शुद्ध
2	8	सोध	सौध
,,	9	प्रासद	प्रासाद
,,	10	प्रवृतः:	प्रवृत्तः
,,	16	स्तम्भोणु	स्तम्भेषु
3	21	त्थितानिः	त्थितानि।
4	26	वनेस्सा	वनैस्सा
13	19	युधेः	युधैः
14	30	स्थाल	स्थल
16	51	मुदती	सुदती
,,	,,	हनुते	ह्नुते
17	57	गन्धिमुख	गन्धिर्मुख
19	2	जोते ?	जाते ?
20	8	द्रम	द्रुम
,,	15	पमेत्वाम्	पमे त्वाम्
22	28	युष्मापु -	युष्मासु
23	37	सान्धय	सान्धयं
,,	38	ता	तां
26	57	सखी यां	सखीभ्यां
30	19	छायाद्रमैः	छायाद्रुमैः
36	49	किमुविता	किमुचिता
47	10	वे द्मा	वे द्म्या

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृष्ठ	श्लोक	अशुद्ध	शुद्ध
47	13	निरञ्जनः	निरञ्जनैः
49	20	मदावकाशं	मुदावकाशं
56	56	निर्धि	निर्धि
,,	,,	श्रुधारा	समाश्रुधारा
57	63	प्रसिद्धयतः	प्रसिद्ध्यतः
63	17	मण्डलंरत्न	मण्डलीरत्न
66	31	देवर्पा	देवर्षा
69	45	सत्यं	[सत्यं
,,	,,	निति	नीति]
,,	46	बाल	[बाल
,,	,,	चोच्यते	चोच्यते]
71	59	सकृद	[सकृद
,,	,,	सकृत्	सकृत्]
74	70	नैषा	[नैषा
,,	71	तव	तव]
75	3	स्तइमे	स्त इमे
76	5	वाफलं	वा फलं
,,	6	महिमनिस्थि	महिमनि स्थि
,,	7	बभा	बभौ
77	12	भूमि	भूमिर्गोभि
,,	,,	क्षोम	क्षौमै
,,	,,	मिष्टान्य	मिष्टान्यन्नान्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृष्ठ	श्लोक	अशुद्ध	शुद्ध
78	15	स्रग्भिः	स्रग्भि र्गीर्भिः
79	20	शूद्र्यो	शूद्र्यो
,,	,,	स्ये धा	स्येधा
80	25	न्नरुफल	उरुफल
,,	,,	द्रमा	द्रुमा
81	34	हि ना	हि नौ
84	49	नियमस्तव	नियमैस्तव
90	13	राजः	राजः ॥
92	24	दष्टाग्र	दंष्ट्राग्र
93	29	वाक्यर	वाक्यैर
96	42	पूवै	पूर्वै
99	43	हात्रे	होत्रे
100	62	भ्यामे	भ्यागमे
109	40	कमितुस्श्क्रते	कमितुर्क्रते
114	65	द्रतमतः	द्रुतम, तः
115	3	दुर्विदग्धमिव	दुर्विधेन्द्रमिव
118	16	मियद्व, लवत्या	मियद्वलवत्या
120	,,	पद्धता	पद्धतौ
130	19	साविश्ये, वं	साविश्येवं
135	41	द्विजाते	द्विजाते

Bhagavan's Sri Sankaracharya Sanskrit Vidya Mandiram
— 79

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Copies can be had of

K. S. KRISHNAMURTI SASTRI,

5-A/5, North Veli Street,

Madurai.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE